# Yogavasishtha

# યોગવાસિષ્ઠઃ

## Document Information

Text title : yogavAsiShTha

File name : yogavAsiShTha18.itx

Category : yoga

Location : doc_yoga

Latest update : May 25, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# યોગવાસિષ્ઠઃ

વૈરાગ્યપ્રકરણં પ્રથમમ્ ।

પ્રથમઃ સર્ગઃ

। શ્રીમહાગણપતિચરણારવિન્દાભ્યાં નમઃ ।

॥ શ્રીઃ ॥

યતઃ સર્વાણિ ભૂતાનિ પ્રતિભાન્તિ સ્થિતાનિ ચ ।
યત્રૈવોપશમં યાન્તિ તસ્મૈ સત્યાત્મને નમઃ ॥ ૧॥

જ્ઞાતા જ્ઞાનં તથા જ્ઞેયં દ્રષ્ટા દર્શનદૃશ્યભૂઃ ।
કર્તા હેતુઃ ક્રિયા યસ્માત્તસ્મૈ જ્ઞપ્ત્યાત્મને નમઃ ॥ ૨॥

સ્ફુરન્તિ સીકરા યસ્માદાનન્દસ્યામ્બરેઽવનૌ ।
સર્વેષાં જીવનં તસ્મૈ બ્રહ્માનન્દાત્મને નમઃ ॥ ૩॥

સુતીક્ષ્ણો બ્રાહ્મણઃ કશ્ચિત્સંશયાકૃષ્ટમાનસઃ ।
અગસ્તેરાશ્રમં ગત્વા મુનિં પપ્રચ્છ સાદરમ્ ॥ ૪॥

સુતીક્ષ્ણ ઉવાચ ।
ભગવન્ધર્મતત્ત્વજ્ઞ સર્વશાસ્ત્રવિનિશ્ચિત ।
સંશયોઽસ્તિ મહાનેકસ્ત્વમેતં કૃપયા વદ ॥ ૫॥

મોક્ષસ્ય કારણં કર્મ જ્ઞાનં વા મોક્ષસાધનમ્ ।
ઉભયં વા વિનિશ્ચિત્ય એકં કથય કારણમ્ ॥ ૬॥

અગસ્તિ ઉવાચ ।
ઉભાભ્યામેવ પક્ષાભ્યાં યથા ખે પક્ષિણાં ગતિઃ ।
તથૈવ જ્ઞાનકર્મભ્યાં જાયતે પરમં પદમ્ ॥ ૭॥

કેવલાત્કર્મણો જ્ઞાનાન્નહિ મોક્ષોઽભિજાયતે ।
કિન્તૂભાભ્યાં ભવેન્મોક્ષઃ સાધનં તૂભયં વિદુઃ ॥ ૮॥

અસ્મિન્નર્થે પુરાવૃત્તમિતિહાસં વદામિ તે ।
કારુણ્યાખ્યઃ પુરા કશ્ચિદ્બ્રાહ્મણોઽધીતવેદકઃ ॥ ૯॥

અગ્નિવેશ્યસ્ય પુત્રોઽભૂદ્વેદવેદાઙ્ગપારગઃ ।
ગુરોરધીતવિદ્યઃ સન્નાજગામ ગૃહં પ્રતિ ॥ ૧૦॥

તસ્થાવકર્મકૃત્તૂષ્ણીં સંશયાનો ગૃહે તદા ।
અગ્નિવેશ્યો વિલોક્યાથ પુત્રં કર્મવિવર્જિતમ્ ॥ ૧૧॥

પ્રાહ એતદ્વચો નિન્દ્યં ગુરુઃ પુત્રં હિતાય ચ ।
અગ્નિવેશ્ય ઉવાચ ।
કિમેતત્પુત્ર કુરુષે પાલનં ન સ્વકર્મણઃ ॥ ૧૨॥

અકર્મનિરતઃ સિદ્ધિં કથં પ્રાપ્સ્યસિ તદ્વદ ।
કર્મણોઽસ્માન્નિવૃતેઃ કિં કારણં તન્નિવેદ્યતામ્ ॥ ૧૩॥

કારુણ્ય ઉવાચ ।
યાવજ્જિવમગ્નિહોત્રં નિત્યં સન્ધ્યામુપાસયેત્ ।
પ્રવૃત્તિરૂપો ધર્મોઽયં શ્રુત્યા સ્મૃત્યા ચ ચોદિતઃ ॥ ૧૪॥

ન ધનેન ભવેન્મોક્ષઃ કર્મણા પ્રજયા ન વા ।
ત્યાગમાત્રેણ કિન્ત્વેતે યતયોઽશ્નન્તિ ચામૃતમ્ ॥ ૧૫॥

ઇતિ શ્રુત્યાર્દ્વયોર્મધ્યે કિં કર્તવ્યં મયા ગુરો ।
ઇતિ સન્દિગ્ધતાં ગત્વા તૂષ્ણીં ભૂતોઽસ્મિ કર્મણિ ॥ ૧૬॥

અગસ્તિ ઉવાચ ।
ઇત્યુક્ત્વા તાત વિપ્રોઽસૌ કારુણ્યો મૌનમાગતઃ ।
તથાવિધં સુતં દૃષ્ટ્વા પુનઃ પ્રાહ ગુરુઃ સુતમ્ ॥ ૧૭॥

અગ્નિવેશ્ય ઉવાચ ।
શ઼ૃણુ પુત્ર કથામેકાં તદર્થં હૃદયેઽખિલમ્ ।
મત્તોઽવધાર્ય પુત્ર ત્વં યથેચ્છસિ તથા કુરુ ॥ ૧૮॥

સુરુચિર્નામ કાચિત્સ્ત્રી અપ્સરોગણૌત્તમા ।
ઉપવિષ્ટા હિમવતઃ શિખરે શિખિસંવૃતે ॥ ૧૯॥

રમન્તે કામસન્તપ્તાઃ કિન્નર્યો યત્ર કિન્નરૈઃ ।
સ્વર્ધુન્યોઘેન સંસૃષ્ટે મહાઘૌઘવિનાશિના ॥ ૨૦॥

દૂતમિન્દ્રસ્ય ગચ્છન્તમન્તરિક્ષે દદર્શ સા ।
તમુવાચ મહાભાગા સુરુચિશ્ચાપ્સરોવરા ॥ ૨૧॥

સુરુચિરુવાચ ।
દેવદૂત મહાભાગ કુત આગમ્યતે ત્વયા ।
અધુના કુત્ર ગન્તાસિ તત્સર્વં કૃપયા વદ ॥ ૨૨॥

દેવદૂત ઉવાચ ।
સાધુ પૃષ્ટં ત્વયા સુભ્રુ યથાવત્કથયામિ તે ।
અરિષ્ટનેમી રાજર્ષિર્દત્ત્વા રાજ્યં સુતાય વૈ ॥ ૨૩॥

વીતરાગઃ સ ધર્માત્મા નિર્યયૌ તપસે વનમ્ ।
તપશ્ચરત્યસૌ રાજા પર્વતે ગન્ધમાદને ॥ ૨૪॥

કાર્યં કૃત્વા મયા તત્ર તત આગમ્યતેઽધુના ।
ગન્તાસ્મિ પાર્શ્વે શક્રસ્ય તં વૃત્તાન્તં નિવેદિતુમ્ ॥ ૨૫॥

અપ્સરા ઉવાચ ।
વૃત્તાન્તઃ કોઽભવત્તત્ર કથયસ્વ મમ પ્રભો ।
પ્રષ્ટુકામા વિનીતાસ્મિ નોદ્વેગં કર્તુમર્હસિ ॥ ૨૬॥

દેવદૂત ઉવાચ ।
શ ૃણુ ભદ્રે યથાવૃત્તં વિસ્તરેણ વદામિ તે ।
તસ્મિન્રાજ્ઞિ વને તત્ર તપશ્ચરતિ દુસ્તરમ્ ॥ ૨૭॥

ઇત્યહં દેવરાજેન સુભ્રુરાજ્ઞાપિતસ્તદા ।
દૂત ત્વં તત્ર ગચ્છાશુ ગૃહીત્વેદં વિમાનકમ્ ॥ ૨૮॥

અપ્સરોગણસંયુક્તં નાનાવાદિત્રશોભિતમ્ ।
ગન્ધર્વસિદ્ધયક્ષૈશ્ચ કિન્નરાદ્યૈશ્ચ શોભિતમ્ ॥ ૨૯॥

તાલવેણુમૃદઙ્ગાદિ પર્વતે ગન્ધમાદને ।
નાનાવૃક્ષસમાકીર્ણે ગત્વા તસ્મિન્ગિરૌ શુભે ॥ ૩૦॥

અરિષ્ટનેમિં રાજાનં દૂતારોપ્ય વિમાનકે ।
આનય સ્વર્ગભોગાય નગરીમમરાવતીમ્ ॥ ૩૧॥

દૂત ઉવાચ ।
ઇત્યાજ્ઞાં પ્રાપ્ય શક્રસ્ય ગૃહિત્વા તદ્વિમાનકમ્ ।

સર્વોપસ્કરસંયુક્તં તસ્મિન્નદ્રાવહં યયૌ ॥ ૩૨॥

આગત્ય પર્વતે તસ્મિન્રાજ્ઞો ગત્વાऽऽશ્રમં મયા ।
નિવેદિતા મહેન્દ્રસ્ય સર્વાજ્ઞાऽરિષ્ટનેમયે ॥ ૩૩॥

ઇતિ મદ્વચનં શ્રુત્વા સંશયાનોऽવદચ્છુભે ।
રાજોવાચ ।
પ્રષ્ટુમિચ્છામિ દૂત ત્વાં તન્મે ત્વં વક્તુમર્હસિ ॥ ૩૪॥

ગુણા દોષાશ્ચ કે તત્ર સ્વર્ગે વદ મમાગ્રતઃ ।
જ્ઞાત્વા સ્થિતિં તુ તત્રત્યાં કરિષ્યેऽહં યથારુચિ ॥ ૩૫॥

દૂત ઉવાચ ।
સ્વર્ગે પુણ્યસ્ય સામગ્ર્યા ભુજ્યતે પરમં સુખમ્ ।
ઉત્તમેન તુ પુણ્યેન પ્રાપ્નોતિ સ્વર્ગમુત્તમમ્ ॥ ૩૬॥

મધ્યમેન તથા મધ્યઃ સ્વર્ગો ભવતિ નાન્યથા ।
કનિષ્ઠેન તો પુણ્યેન સ્વર્ગો ભવતિ તાદૃશઃ ॥ ૩૭॥

પરોત્કર્ષાસહિષ્ણુત્વં સ્પર્ધા ચૈવ સમૈશ્ચ તૈઃ ।
કનિષ્ઠેષુ ચ સન્તોષો યાવત્પુણ્યક્ષયો ભવેત્ ॥ ૩૮॥

ક્ષીણે પુણ્યે વિશન્ત્યેતં મર્ત્યલોકં ચ માનવાઃ ।
ઇત્યાદિગુણદોષાશ્ચ સ્વર્ગે રાજન્નવસ્થિતાઃ ॥ ૩૯॥

ઇતિ શ્રુત્વા વચો ભદ્રે સ રાજા પ્રત્યભાષત ।
રાજોવાચ ।
નેચ્છામિ દેવદૂતાહં સ્વર્ગમીદૃગ્વિધં ફલમ્ ॥ ૪૦॥

અતઃ પરં મહોગ્રં ચ તપઃ કૃત્વા કલેવરમ્ ।
ત્યક્ષ્યામ્યહમશુદ્ધં હિ જીર્ણાં ત્વચમિવોરગઃ ॥ ૪૧॥

દેવદૂત વિમાનેદં ગૃહીત્વા ત્વં યથાગતઃ ।
તથા ગચ્છ મહેન્દ્રસ્ય સન્નિધૌ ત્વં નમોऽસ્તુ તે ॥ ૪૨॥

દેવ્દૂત ઉવાચ ।
ઇત્યુક્તોऽહં ગતો ભદ્રે શક્રસ્યાગ્રે નિવેદિતુમ્ ।
યથાવૃત્તં નિવેદ્યાથ મહદાશ્ચર્યતાં ગતઃ ॥ ૪૩॥

પુનઃ પ્રાહ મહેન્દ્રો માં શ્લક્ષ્ણં મધુરયા ગિરા ।

ઇન્દ્ર ઉવાચ ।
દૂત ગચ્છ પુનસ્તત્ર તં રાજાનં નયાશ્રમમ્ । । ૪૪॥

વાલ્મીકેર્જ્ઞાતતત્ત્વસ્ય સ્વભોધાર્થં વિરાગિણમ્ ।
સન્દેશં મમ વાલ્મીકેર્મહર્ષેસ્ત્વં નિવેદય ॥ ૪૫॥

મહર્ષે ત્વં વિનીતાય રાજ્ઞેઽસ્મૈ વીતરાગિણે ।
નસ્વર્ગમિચ્છતે તત્ત્વં પ્રબોધાય મહામુને ॥ ૪૬॥

તેન સંસારદુઃખાર્તો મોક્ષમેષ્યતિ ચ ક્રમાત્ ।
ઇત્યુક્ત્વા દેવરાજેન પ્રેષિતોઽહં તદન્તિકે ॥ ૪૭॥

મયાગત્ય પુનસ્તત્ર રાજા વલ્મીકજન્મને ।
નિવેદિતા મહેન્દ્રસ્ય રાજ્ઞા મોક્ષ્યસ્ય સાધનમ્ ॥ ૪૮॥

તતો વલ્મીકજન્માસૌ રાજાનં સમપૃચ્છત ।
અનામયમતિપ્રીત્યા કુશલપ્રશ્નવાર્તયા ॥ ૪૯॥

રાજોવાચ ।
ભગવન્ધર્મતત્ત્વજ્ઞ જ્ઞાતજ્ઞેય વિદાંવર ।
કૃતાર્થોઽહં ભવદૃષ્ટ્યા તદેવ કુશલં મમ ॥ ૫૦॥

ભગવન્પ્રષ્ટુમિચ્છામિ તદવિઘ્નેન મે વદ ।
સંસારબન્ધદુઃખાર્તે કથં મુઞ્ચામિ તદ્વદ ॥ ૫૧॥

વાલ્મીકિરુવાચ ।
શ્ૃણુ રાજન્પ્રવક્ષ્યામિ રામાયણમખણ્ડિતમ્ ।
શ્રુત્વાવધાર્ય યત્નેન જીવન્મુક્તો ભવિષ્યસિ ॥ ૫૨॥

વસિષ્ટરામસંવાદં મોક્ષોપાયકથાં શુભામ્ ।
જ્ઞાતસ્વભાવો રાજેન્દ્ર વદામિ શ્રૂયતાં બુધ ॥ ૫૩॥

રાજોવચ ।
કો રામઃ કીદૃશઃ કસ્ય બદ્ધો વા મુક્ત એવ વા ।
એતન્મે નિશ્ચિતં બ્રૂહિ જ્ઞાનં તત્ત્વવિદાં વર ॥ ૫૪॥

વાલ્મીકિરુવાચ ।
શાપવ્યાજવશાદેવ રાજવેષધરો હરિઃ ।
આહૃતાજ્ઞાનસમ્પન્નઃ કિઞ્ચિજ્જ્ઞોઽસૌ ભવત્પ્રભુઃ ॥ ૫૫॥

રાજોવચ ।
ચિદાનન્દસ્વરૂપે હિ રામે ચૈતન્યવિગ્રહે ।
શાપસ્ય કારણં બ્રૂહિ કઃ શપ્તા ચેતિ મે વદ ॥ ૫૬॥

વાલ્મીકિરુવાચ ।
સનત્કુમારો નિષ્કામ અવસદ્બ્રહ્મસદ્મનિ ।
વૈકુણ્ઠાદાગતો વિષ્ણુસ્ત્રૈલોક્યાધિપતિઃ પ્રભુઃ ॥ ૫૭॥

બ્રહ્મણા પૂજિતસ્ત્ર સત્યલોકનિવાસિભિઃ ।
વિના કુમારં તં દૃષ્ટ્વા હ્યુવાચ પ્રભુરીશ્વરઃ ॥ ૫૮॥

સનત્કુમાર સ્તબ્ધોઽસિ નિષ્કામો ગર્વચેષ્ટયા ।
અતસ્ત્વં ભવ કામાર્તઃ શરજન્મેતિ નામતઃ ॥ ૫૯॥

તેનાપિ શાપિતો વિષ્ણુઃ સર્વજ્ઞત્વં તવાસ્તિ યત્ ।
કિઞ્ચિત્કાલં હિ તત્ત્યક્ત્વા ત્વમજ્ઞાની ભવિષ્યસિ ॥ ૬૦॥

ભૃગુર્ભાર્યાં હતાં દૃષ્ટ્વા હ્યુવાચ ક્રોધમૂર્ચ્છિતઃ ।
વિષ્ણો તવાપિ ભાર્યાયા વિયોગો હિ ભવિષ્યતિ ॥ ૬૧॥

વૃન્દયા શાપિતો વિષ્ણુશ્છલનં યત્ત્વયા કૃતમ્ ।
અતસ્ત્વં સ્ત્રીવિયોગં તુ વચનાન્મમ યાસ્યસિ ॥ ૬૨॥

ભાર્યા હિ દેવદત્તસ્ય પયોષ્ણીતીરસંસ્થિતા ।
નૃસિંહવેષધૃગ્વિષ્ણું દૃષ્ટ્વા પઞ્ચત્વમાગતા ॥ ૬૩॥

તેન શપ્તો હિ નૃહરિર્દુઃખાર્તઃ સ્ત્રીવિયોગતઃ ।
તવપિ ભાર્યયા સાર્ધં વિયોગો હિ ભવિષ્યતિ ॥ ૬૪॥

ભૃગુણૈવં કુમારેણ શાપિતો દેવશર્મણા ।
વૃન્દયા શાપિતો વિષ્ણુસ્તેન માનુષ્યતાં ગતઃ ॥ ૬૫॥

એતત્તે કથિતં સર્વં શાપવ્યાજસ્ય કારણમ્ ।
ઇદાનીં વચ્મિ તત્સર્વં સાવધાનમતિઃ શ◌ૃણુ ॥ ૬૬॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે દેવદૂતોક્તે
મોક્ષોપાયે દ્વાત્રિંશત્સાહસ્ર્યાં સંહિતાયાં વૈરાગ્યપ્રકરણે
સૂત્રપાતનકો નામ પ્રથમઃ સર્ગઃ ॥ ૧॥

દ્વિતીયઃ સર્ગઃ

દિવિ ભૂમૌ તથાકાશે બહિરન્તશ્ચ મે વિભુઃ ।
યો વિભાત્યવભાસાત્મા તસ્મૈ સર્વાત્મને નમઃ ॥ ૧॥

વાલ્મીકિરુવાચ ।
અહં બદ્ધો વિમુક્તઃ સ્યામિતિ યસ્યાસ્તિ નિશ્ચયઃ ।
નાત્યન્તમજ્ઞો નોત જ્ઞઃ સોઽસ્મિઞ્છાસ્ત્રેઽધિકારવાન્ ॥ ૨॥

કથોપાયાન્વિચાર્યાદૌ મોક્ષોપાયાનિમાનથ ।
યો વિચારયતિ પ્રજ્ઞો ન સ ભૂયોઽભિજાયતે ॥ ૩॥

અસ્મિન્રામાયણે રામકથોપાયાન્મહાબલાન્ ।
એતાંસ્તુ પ્રથમં કૃત્વા પુરાહમરિમર્દન ॥ ૪॥

શિષ્યાસાસ્મિ વિનીતાય ભરદ્વાજાય ધીમતે ।
એકાગ્રો દત્તવાંસ્તસ્મૈ મણિમબ્ધિરિવાર્થિને ॥ ૫॥

તત એતે કથોપાયા ભરદ્વાજેન ધીમતા ।
કસ્મિંશ્ચિન્મેરુગહને બ્રહ્મણોઽગ્ર ઉદાહૃતાઃ ॥ ૬॥

અથાસ્ય તુષ્ટો ભગવાન્બ્રહ્મા લોકપિતામહઃ ।
વરં પુત્ર ગૃહાણેતિ તમુવાચ મહાશયઃ ॥ ૭॥

ભરદ્વાજ ઉવાચ ।
ભગવન્ભૂતભવ્યેશ વરોઅયં મે/ઽદ્ય રોચતે ।
યેનેયં જનતા દુઃખાન્મુચ્યતે તદુદાહર ॥ ૮॥

શ્રીબ્રહ્મોવાચ ।
ગુરું વાલ્મીકિમત્રાશુ પ્રાર્થયસ્વ પ્રયત્નતઃ ।
તેનેદં યત્સમારબ્ધં રામાયણમનિન્દિતમ્ ॥ ૯॥

તસ્મિઞ્છ્રુતે નરો મોહાત્સમગ્રાત્સન્તરિષ્યતિ ।
સેતુનેવામ્બુધેઃ પારમપારગુણશાલિના ॥ ૧૦॥

શ્રીવાલ્મીકિરુવાચ ।
ઇત્યુક્ત્વા સ ભરદ્વાજં પરમેષ્ઠી મદાશ્રમમ્ ।
અભ્યાસગચ્છત્સમં તેન ભરદ્વાજેન ભૂતકૃત્ ॥ ૧૧॥

તૂર્ણં સમ્પૂજિતો દેવઃ સોઽર્ઘ્યપાદ્યાદિના મયા ।

અવોચન્માં મહાસત્ત્વઃ સર્વભૂતહિતે રતઃ ॥ ૧૨॥

રામસ્વભાવકથનાદસ્માદ્વરમુને ત્વયા ।
નોદ્વેગાત્સ પરિત્યાજ્ય આસમાપ્તેરનિન્દિતાત્ ॥ ૧૩॥

ગ્રન્થેનાનેન લોકોઽયમસ્માત્સંસારસઙ્કટાત્ ।
સમુત્તરિષ્યતિ ક્ષિપ્રં પોતેનેવાશુ સાગરાત્ ॥ ૧૪॥

વક્તું તદેવમેવાર્થમહમાગતવાનયમ્ ।
કુરુ લોકહિતાર્થં ત્વં શાસ્ત્રમિત્યુક્તવાનજઃ ॥ ૧૫॥

મમ પુણ્યાશ્રમાત્તસ્માત્ક્ષણાદન્તર્દ્ધિમાગતઃ ।
મુહૂર્તાભ્યુત્થિતઃ પ્રોચ્ચૈસ્તરઙ્ગ ઇવ વારિણઃ ॥ ૧૬॥

તસ્મિન્પ્રયાતે ભવત્યહં વિસ્મયમાગતઃ ।
પુનસ્તત્ર ભરદ્વાજંઅપૃચ્છં સ્વસ્થયા ધિયા ॥ ૧૭॥

કિમતેદ્બ્રહ્મણા પ્રોક્તં ભરદ્વાજ વદાશુ મે ।
ઇત્યુક્તેન પુનઃ પ્રોક્તં ભરદ્વાજેન તેન મે ॥ ૧૮॥

ભરદ્વાજ ઉવાચ ।
એતદુક્તં ભગવતા યથા રામાયણં કુરુ ।
સર્વલોકહિતાર્થાય સંસારાર્ણવતારકમ્ ॥ ૧૯॥

મહ્યં ચ ભગવન્બ્રૂહિ કથં સંસારસઙ્કટે ।
રામો  વ્યવહૃતો હ્યસ્મિન્ભરતશ્ચ મહામનાઃ ॥ ૨૦॥

શત્રુઘ્નો લક્ષ્મણશ્ચાપિ સીતા ચાપિ યશસ્વિની ।
રામાનુયાયિનસ્તે વા મન્ત્રિપુત્રા મહાધિયઃ ॥ ૨૧॥

નિર્દુઃખિતાં યથૈતે નુ પ્રાપ્તાસ્તદ્બ્રૂહિ મે સ્ફુટમ્ ।
તથૈવાહં ભવિષ્યામિ તતો જનતયા સહ ॥ ૨૨॥

ભરદ્વાજેન રાજેન્દ્ર વદેત્યુક્તોઽસ્મિ સાદરમ્ ।
તદા કર્તું વિભોરાજ્ઞામહં વક્તું પ્રવૃત્તવાન્ ॥ ૨૩॥

શ ૃણુ વત્સ ભરદ્વાજ યથાપૃષ્ટં વદામિ તે ।
શ્રુતેન યેન સંમોહમલં દૂરે કરિષ્યસિ ॥ ૨૪॥

તથા વ્યવહર પ્રાજ્ઞ યથા વ્યવહૃતઃ સુખી ।
સર્વાસંસક્તયા બુદ્ધ્યા રામો રાજીવલોચનઃ ॥ ૨૫॥

લક્ષ્મણો ભરતશ્ચૈવ શત્રુઘ્નશ્ચ મહામનાઃ ।
કૌસલ્યા ચ સુમિત્રા ચ સીતા દશરથસ્તધા ॥ ૨૬॥

કૃતાસ્ત્રશ્ચાઽવિરોધશ્ચ બોધપારમુપાગતાઃ ।
વસિષ્ઠો વામદેવશ્ચ મન્ત્રિણોઽષ્ટૌ તથેતરે ॥ ૨૭॥

ધૃષ્ટિર્જયન્તો ભાસશ્ચ સત્યો વિજય એવ હિ ।
વિભીષણઃ સુષેણશ્ચ હનુમાનિન્દ્રજિત્તથા ॥ ૨૮॥

એતેઽષ્ટૌ મન્ત્રિણ પ્રોક્તાઃ સમનીરાગચેતસઃ ।
જીવન્મુક્તા મહાત્માનો યથાપ્રાપ્તાનુવર્તિનઃ ॥ ૨૯॥

એતૈર્યથા હુતં દત્તં ગૃહીતમુષિતં સ્મૃતમ્ ।
તથા ચેદ્વર્તસે પુત્ર મુક્ત એવાસિ સઙ્કટાત્ ॥ ૩૦॥

અપારસંસારસમુદ્રપાતી
    લબ્ધ્વા પરાં યુક્તિમુદારસત્ત્વઃ ।
નશોકમાયાતિ ન દૈન્યમેતિ
    ગતજ્વરસ્તિષ્ઠતિ નિત્યતૃપ્તઃ ॥ ૩૧॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે સૂત્રપાતનકો નામ દ્વિતીયઃ સર્ગઃ ॥ ૨॥

---

## તૃતીયઃ સર્ગઃ

ભરદ્વાજ ઉવાચ ।
જીવન્મુક્તસ્થિતિં બ્રહ્મન્કૃત્વા રાઘવમાદિતઃ ।
ક્રમાત્કથય મે નિત્યં ભવિષ્યામિ સુખી યથા ॥ ૧॥

શ્રીવાલ્મીકિરુવાચ ।
ભ્રમસ્ય જાગતસ્યાસ્ય જાતસ્યાકાશવર્ણવત્ ।
અપુનઃસ્મરણં મન્યે સાધો વિસ્મરણં વરમ્ ॥ ૨॥

દૃશ્યાત્યન્તાભાવબોધં વિના તન્નાનુભૂયતે ।
કદાચિત્કેનચિન્નામ સ્વબોધોઽન્વિષ્યતામતઃ ॥ ૩॥

સ ચેહ સમ્ભવત્યેવ તદર્થમિદમાતતમ્ ।

શાસ્ત્રમાકર્ણયસિ ચેત્તત્ત્વમાપ્સ્યસિ નાન્યથા ॥ ૪॥

જગદ્ભ્રમોઽયં દૃશ્યોઽપિ નાસ્ત્યેવેત્યનુભૂયતે ।
વર્ણો વ્યોમ્ન ઇવાખેદાદ્વિચારણામુનાઽનઘ ॥ ૫॥

દૃશ્યં નાસ્તીતિ બોધેન મનસો દૃશ્યમાર્જનમ્ ।
સમ્પન્નં ચેત્તદુત્પન્ના પરા નિર્વાણનિર્વૃતિઃ ॥ ૬॥

અન્યથા શાસ્ત્રગર્તેષુ લુઠતાં ભવતામિહ ।
ભવત્યકૃત્રિમાજ્ઞાનાં કલ્પૈરપિ ન નિર્વૃતિઃ ॥ ૭॥

અશેષેણ પરિત્યાગો વાસનાનાં ય ઉત્તમઃ ।
મોક્ષ ઇત્યુચ્યતે બ્રહ્મન્સ એવ વિમલક્રમઃ ॥ ૮॥

ક્ષીણાયાં વાસનાયાં તુ ચેતો ગલતિ સત્વરમ્ ।
ક્ષીણાયાં શીતસન્તત્યાં બ્રહ્મન્હિમકણો યથા ॥ ૯॥

અયં  વાસનયા દેહો ધ્રિયતે ભૂતપઞ્જરઃ ।
તનુનાન્તર્નિવિષ્ટેન મુક્તૌઘસ્તન્તુના યથા ॥ ૧૦॥

વાસના દ્વિવિધા પ્રોક્તા શુદ્ધા ચ મલિના તથા ।
મલિના જન્મનો હેતુઃ શુદ્ધા જન્મવિનાશિની ॥ ૧૧॥

અજ્ઞાનસુઘનાકારા ઘનાહઙ્કારશાલિની ।
પુનર્જન્મકરી પ્રોક્તા મલિના વાસના બુધૈઃ ॥ ૧૨॥

પુનર્જન્માઙ્કુરં ત્યક્ત્વાસ્થિતા સમ્ભૃષ્ટબીજવત્ ।
દેહાર્થં ધ્રિયતે જ્ઞાતજ્ઞેયા શુદ્ધેતિ ચોચ્યતે ॥ ૧૩॥

અપુનર્જન્મકરણી જીવન્મુક્તેષુ દેહિષુ ।
વાસના વિદ્યતે શુદ્ધા દેહે ચક્ર એવ ભ્રમઃ ॥ ૧૪॥

યે શુદ્ધવાસના ભૂયો ન જન્માનર્થભાજનમ્ ।
જ્ઞાતજ્ઞેયાસ્ત ઉચ્યન્તે જીવન્મુક્તા મહાધિયઃ ॥ ૧૫॥

જીવન્મુક્તિપદં પ્રાપ્તો યથા રામો મહામતિઃ ।
તત્તેઽહં શ‍ृણુ વક્ષ્યામિ જરામરણશાન્તયે ॥ ૧૬॥

ભરદ્વાજ મહાબુદ્ધે રામક્રમમિમં શુભમ્ ।
શ‍ृણુ વક્ષ્યામિ તેનૈવ સર્વં જ્ઞાસ્યસિ સર્વદા ॥ ૧૭॥

વિદ્યાગૃહાદ્વિનિષ્ક્રમ્ય રામો રાજીવલોચનઃ ।
દિવસાન્યનયદ્ગેહે લીલાભિરકુતોભયઃ ॥ ૧૮॥

અથ ગચ્છતિ કાલે તુ પાલયત્યવનિં નૃપે ।
પ્રજાસુ વીતશોકાસુ સ્થિતાસુ વિગતજ્વરમ્ ॥ ૧૯॥

તીર્થપુણ્યાશ્રમશ્રેણીર્દ્રષ્ટુમુત્કણ્ઠિતં મનઃ ।
રામસ્યાભૂદ્ભૃશં તત્ર કદાચિત્ગુણશાલિનઃ ॥ ૨૦॥

રાઘવશ્ચિન્તયિત્વૈવમુપેત્ય ચરણૌ પિતુઃ ।
હંસઃ પદ્માવિવ નવૌ જગ્રાહ નખકેસરૌ ॥ ૨૧॥

શ્રીરામ ઉવાચ ।
તીર્થાનિ દેવસદ્માનિ વનાન્યાયતનાનિ ચ ।
દ્રષ્ટુમુત્કણ્ઠિતં તાત મમેદં નાથ માનસમ્ ॥ ૨૨॥

તદેતામર્થિતાં પૂર્વાં સફલાં કર્તુમર્હસિ ।
ન સોઽસ્તિ ભુવને નાથ ત્વયા યોઽર્થી ન માનિતઃ ॥ ૨૩॥

ઇતિ સં પ્રાર્થિતો રાજા વસિષ્ઠેન સમં તદા ।
વિચાર્યામુઞ્ચદેવૈનં રામં પ્રથમમર્થિનમ્ ॥ ૨૪॥

શુભે નક્ષત્રદિવસે ભ્રાતૃભ્યાં સહ રાઘવઃ ।
મઙ્ગલાલઙ્કૃતવપુઃ કૃતસ્વસ્ત્યયનો દ્વિજૈઃ ॥ ૨૫॥

વસિષ્ઠપ્રહિતૈર્વિપ્રૈઃ શાસ્ત્રજ્ઞૈશ્ચ સમન્વિતઃ ।
સ્નિગ્ધૈ કતિપયૈરેવ રાજપુત્રવરૈઃ સહ ॥ ૨૬॥

અમ્બાભિર્વિહિતાશીર્ભિરાલિઙ્ગ્યાલિઙ્ગ્ય ભૂષિતઃ ।
નિરગાત્સ્વગૃહાત્તસ્માત્તીર્થયાત્રાર્થમુદ્યતઃ ॥ ૨૭॥

નિર્ગતઃ સ્વપુરાત્પૌરેસ્તૂર્યઘોષેણ વાદિતઃ ।
પીયમાનઃ પુરસ્ત્રીણાં નેત્રૈર્ભૃઙ્ગૌઘભઙ્ગુરૈઃ ॥ ૨૮॥

ગ્રામીણલલનાલોલહસ્તપદ્માપનોદિતૈઃ ।
લાજવર્ષૈર્વિકીર્ણાત્મા હિમૈરિવ હિમાચલઃ ॥ ૨૯॥

આવર્જયન્વિપ્રગણાન્પરિશ્ૃણ્વન્પ્રજાશિષઃ ।
આલોકયન્દિગન્તાંશ્ચ પરિચક્રામ જાઙ્ગલાન્ ॥ ૩૦॥

અથારભ્ય સ્વકાત્તસ્માત્ક્રમાત્કોશલમણ્ડલાત્ ।

સ્નાનદાનતપોધ્યાનપૂર્વકં સ દદર્શ હ ॥ ૩૧॥

નદીતીરાણિ પુણ્યાનિ વનાન્યાયતનાનિ ચ
જઙ્ગલાનિ જનાન્તેષુ તટાન્યબ્ધિમહીભૃતામ્ ॥ ૩૨॥

મન્દાકિનીમિન્દુનિભાં કાલિન્દીં ચોત્પલામલામ્ ।
સરસ્વતીં શતદ્રૂં ચ ચન્દ્રાભાગામિરાવતીમ્ ॥ ૩૩॥

વેણીં ચ કૃષ્ણવેણીં ચ નિર્વિન્ધ્યાં સરયૂં તથા ।
ચર્મણ્વતીં વિતસ્તાં ચ વિપાશાં બાહુદામપિ ॥ ૩૪॥

પ્રયાગં નૈમિષં ચૈવ ધર્મારણ્યં ગયાં તથા ।
વારાણસીં શ્રીગિરિં ચ કેદારં પુષ્કરં તથા ॥ ૩૫॥

માનસં ચ ક્રમસરસ્તથૈવોત્તરમાનસમ્ ।
વડવાવદનં ચૈવ તીર્થવૃન્દં સ સાદરમ્ ॥ ૩૬॥

અગ્નિતીર્થં મહાતીર્થમિન્દ્રદ્યુમ્નસરસ્તથા ।
સરાંસિ સરિતશ્ચૈવ તથા નદહ્રદાવલીમ્ ॥ ૩૭॥

સ્વામિનં કાર્તિકેયં ચ શાલગ્રામં હરિં તથા ।
સ્થાનાનિ ચ ચતુઃષષ્ટિં હરેરથ હરસ્ય ચ ॥ ૩૮॥

નાનાશ્ચર્યવિચિત્રાણિ ચતુરબ્ધિતટાનિ ચ ।
વિન્ધ્યમન્દરકુઞ્જાંશ્ચ કુલશૈલાસ્થલાનિ ચ ॥ ૩૯॥

રાજર્ષીણાં ચ મહતાં બ્રહ્મર્ષીણાં તથૈવ ચ ।
દેવાનાં બ્રાહ્મણાનાં ચ પાવનાનાશ્રમાઞ્છુભાન્ ॥ ૪૦॥

ભૂયોભૂયઃ સ બભ્રામ ભ્રાતૃભ્યાં સહ માનદઃ ।
ચતુર્ષ્વપિ દિગન્તેષુ સર્વાનેવ મહીતટાન્ ॥ ૪૧॥

અમરકિન્નરમાનવમાનિતઃ
　　સમવલોક્ય મહીમખિલામિમામ્ ।
ઉપયયૌ સ્વગૃહં રઘુનન્દનો
　　વિહૃતદિક્ શિવલોકમિવેશ્વરઃ ॥ ૪૨॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે તીર્થયાત્રાપ્રકરણં નામ તૃતીયઃ સર્ગઃ ॥ ૩॥

## ચતુર્થઃ સર્ગઃ

શ્રીવાલ્મીકિરુવાચ ।

રામઃ પુષ્પાઞ્જલિવ્રાતૈર્વિકીર્ણઃ પુરવાસિભિઃ ।
પ્રવિવેશ ગૃહં શ્રીમાઞ્જયન્તો વિષ્ટપં યથા ॥ ૧॥

પ્રણનામાથ પિતરં વસિષ્ઠં ભ્રાતૃબાન્ધવાન્ ।
બ્રાહ્મણાન્કુલવૃદ્ધાંશ્ચ રાઘવઃ પ્રથમાગતઃ ॥ ૨॥

સુહૃદ્ભિર્ભ્રાતૃભિશ્ચૈવ પિત્રા દ્વિજગણેન ચ ।
મુહુરાલિઙ્ગિતાચારો રાઘવો ન મમૌ મુદા ॥ ૩॥

તસ્મિન્ગૃહે દાશરથેઃ પ્રિયપ્રકથનૈર્મિથઃ ।
જુઘુર્ણુર્મધુરૈરાશા મૃદુવંશસ્વનૈરિવ ॥ ૪॥

બભૂવાથ દિનાન્યષ્ટૌ રામાગમન ઉત્સવઃ ।
સુખં મત્તજનોન્મુક્તકલકોલાહલાકુલઃ ॥ ૫॥

ઉવાસ સ સુખં ગેહે તતઃ પ્રભૃતિ  રાઘવઃ ।
વર્ણયન્વિવિધાકારાન્દેશાચારાનિતસ્તતઃ ॥ ૬॥

પ્રાતરુત્થાય રામોઽસૌ કૃત્વા સન્ધ્યાં યથાવિધિ ।
સભાસંસ્થં દદર્શેન્દ્રસમં સ્વપિતરં તથા ॥ ૭॥

કથાભિઃ સુવિચિત્રાભિઃ સ વસિષ્ઠાદિભિઃ સહ ।
સ્થિત્વા દિનચતુર્ભાગં જ્ઞાનગર્ભાભિરાદૃતઃ ॥ ૮॥

જગામ પિત્રાનુજ્ઞાતો મહત્યા સેનયા વૃતઃ ।
વરાહમહિષાકીર્ણં વનમાખેટકેચ્છયા ॥ ૯॥

તત આગત્ય સદને કૃત્વા સ્નાનાદિકં ક્રમમ્ ।
સમિત્રબાન્ધવો ભુક્ત્વા નિનાય સસુહૃન્નિશામ્ ॥ ૧૦॥

એવમ્પ્રાયદિનાચારો ભ્રાતૃભ્યાં સહ રાઘવ ।
આગત્ય તીર્થયાત્રાયાઃ સમુવાસ પિતુર્ગૃહે ॥ ૧૧॥

નૃપતિસંવ્યવહારમનોજ્ઞયા
સુજનચેતસિ ચન્દ્રિકયાનયા ।
પરિનિનાય દિનાનિ સ ચેષ્ટયા

સ્તુતસુધારસપેશલયાઽનઘ ॥ ૧૨॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે દિવસવ્યવહારનિરૂપણં નામ ચતુર્થઃ સર્ગઃ ॥ ૪॥

---

પન્ચમ સર્ગઃ

શ્રીવાલ્મીકિરુવાચ ।
અથોનુષોઽશે વર્ષે વર્તમાને રઘૂદ્વહે ।
રામાનુયાયિનિ તથા શત્રુઘ્ને લક્ષ્મણેઽપિ ચ ॥ ૧॥

ભરતે સંસ્થિતે નિત્યં માતામહગૃહે સુખમ્ ।
પાલયત્યવનિં રાજ્ઞિ યથાવદખિલામિમામ્ ॥ ૨॥

જન્યત્રાર્થં ચ પુત્રાણાં પ્રત્યહં સહ મન્ત્રિભિઃ ।
કૃતમન્ત્રે મહાપ્રાજ્ઞે તજ્જ્ઞે દશરથે નૃપે ॥ ૩॥

કૃતાયાં તીર્થયાત્રાયાં રામો નિજગૃહે સ્થિતમ્ ।
જગામાનુદિનં કાર્શ્યં શરદીવામલં સરઃ ॥ ૪॥

કુમારસ્ય વિશાલાક્ષં પાણ્ડુતાં મુખમાદદે ।
પાકફુલ્લદલં શુક્લં સાલિમાલમિવામ્બુજમ્ ॥ ૫॥

કપોલતલસંલીનપાણિઃ પદ્માસનસ્થિતઃ ।
ચિન્તાપરવશસ્તૂષ્ણીમવ્યાપારો બભૂવ હ ॥ ૬॥

કૃશાઙ્ગશ્ચિન્તયા યુક્તઃ ખેદી પરમદુર્મનાઃ ।
નોવાચ કસ્યચિત્કિઞ્ચિલ્લિપિકર્માર્પિતોપમઃ ॥ ૭॥

ખેદાત્પરિજનેનાસૌ પ્રાર્થ્યમાનઃ પુનઃ પુનઃ ।
ચકારાહ્નિકમાચારં પરિમ્લાનમુખામ્બુજઃ ॥ ૮॥

એવઙ્ગુણવિશિષ્ટં તં રામં ગુણગણાકરમ્ ।
આલોક્ય ભ્રાતરાવસ્ય તામેવાયયતુર્દશામ્ ॥ ૯॥

તથા તેષુ તનુજેષુખેદવત્સુ કૃશેષુ ચ ।
સપત્નિકો મહીપાલશ્ચિન્તાવિવશતાં યયૌ ॥ ૧૦॥

કા તે પુત્ર ઘના ચિન્તેત્યેવં રામં પુનઃ પુનઃ ।
અપૃચ્છત્સ્નિગ્ધયા વાચા નૈવાકથયદસ્ય સઃ ॥ ૧૧॥

ન કિઞ્ચિત્તાત મે દુઃખમિત્યુક્ત્વા પિતુરઙ્ગઃ ।
રામો રાજીવપત્રાક્ષસ્તૂષ્ણીમેવ સ્મ તિષ્ઠતિ ॥ ૧૨॥

તતો દશરથો રાજા રામઃ કિં ખેદવાનિતિ ।
અપૃચ્છત્સર્વકાર્યજ્ઞં વસિષ્ઠં વદતાં વરમ્ ॥ ૧૩॥

ઇત્યુક્તશ્ચિન્તયિત્વા સ વસિષ્ઠમુનિના નૃપઃ ।
અસ્ત્યત્ર કારણં શ્રીમન્મા રાજન્દુઃખમસ્તુ તે ॥ ૧૪॥

કોપં વિષાદકલનાં વિતતં ચ હર્ષં
        નાલ્પેન કારણવશેન વહન્તિ સન્તઃ ।
સર્ગેણ સંહૃતિજવેન વિના જગત્યાં
        ભૂતાનિ ભૂપ ન મહાન્તિ વિકારવન્તિ ॥ ૧૫॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે કાર્શ્યનિવેદનં નામ પઞ્ચમઃ સર્ગઃ ॥ ૫

---

ષષ્ઠઃ સર્ગઃ

શ્રીવાલ્મીકિરુવાચ ।
ઇત્યુક્તે મુનિનાથેન સન્દેહવતિ પાર્થિવે ।
ખેદવત્યાસ્થિતે મૌનં કિઞ્ચિત્કાલપ્રતીક્ષણે ॥ ૧॥

પરિખિન્નાસુ સર્વાસુ રાજ્ઞીષુ નૃપસદ્મસુ ।
સ્થિતાસુ સાવધાનાસુ રામચેષ્ટાસુ સર્વતઃ ॥ ૨॥

એતસ્મિન્નેવ કાલે તુ વિશ્વામિત્ર ઇતિ શ્રુતઃ ।
મહર્ષિરભ્યગાદ્દ્રષ્ટું તમયોધ્યાનરાધિપમ્ ॥ ૩॥

તસ્ય યજ્ઞોઽથ રક્ષોભિસ્તથા વિલુલુપે કિલ ।
માયાવીર્યબલોન્મત્તૈર્ધર્મકાર્યસ્ય ધીમતઃ ॥ ૪॥

રક્ષાર્થં તસ્ય યજ્ઞસ્ય દ્રષ્ટુમૈચ્છત્સ પાર્થિવમ્ ।
નહિ શક્નોત્યવિઘ્નેન સમાપ્તું સ મુનિઃ ક્રતુમ્ ॥ ૫॥

તતસ્તેષાં વિનાશાર્થમુદ્યતસ્તપસાં નિધિઃ ।
વિશ્વામિત્રો મહાતેજા અયોધ્યામભ્યગાત્પુરીમ્ ॥ ૬॥

સ રાજ્ઞો દર્શનાકાઙ્ક્ષી દ્વારાધ્યક્ષાનુવાચ હ ।
શીઘ્રમાખ્યાત માં પ્રાપ્તં કૌશિકં ગાધિનઃ સુતમ્ ॥ ૭॥

તસ્ય તદ્વચનં શ્રુત્વા દ્વાસ્થા રાજગૃહં યયુઃ ।
સમ્ભ્રાન્તમનસઃ સર્વે તેન વાક્યેન ચોદિતાઃ ॥ ૮॥

તે ગત્વા રાજસદનં વિશ્વામિત્રમૃષિં તતઃ ।
પ્રાપ્તમાવેદયામાસુઃ પ્રતીહારાઃ પતેસ્તદા ॥ ૯॥

અથાસ્થાનગતં ભૂપં રાજમણ્ડલમાલિનમ્ ।
સમુપેત્ય ત્વરાયુક્તો યાષ્ટીકોઽસૌ વ્યજિજ્ઞપત્ ॥ ૧૦॥

દેવ દ્વારિ મહાતેજા બાલભાસ્કરભાસુરઃ ।
જ્વાલારુણજટાજૂટઃ પુમાઞ્છ્રીમાનવસ્થિતઃ ॥ ૧૧॥

સભાસુરાપતાકાન્તં સાશ્વેભપુરુષાયુધમ્ ।
કૃતવાંસ્તં પ્રદેશં યસ્તેજોભિઃ કીર્ણકાઞ્ચનમ્ ॥ ૧૨॥

વીક્ષ્યમાણે તુ યાષ્ટિકે નિવેદયતિ રાજનિ ।
વિશ્વામિત્રો મુનિઃ પ્રાપ્ત ઇત્યનુદ્ધતયા ગિરા ॥ ૧૩॥

ઇતિ યાષ્ટીકવચનમાકર્ણ્ય નૃપસત્તમઃ ।
સ સમન્ત્રી સસામન્તઃ પ્રોત્તસ્થૌ હેમવિષ્ટરાત્ ॥ ૧૪॥

પદાતિરેવ સહસા રાજ્ઞાં વૃન્દેન માલિતઃ ।
વસિષ્ઠવામદેવાભ્યાં સહ સામન્તસંસ્તુતઃ ॥ ૧૫॥

જગામ તત્ર યત્રાસૌ વિશ્વામિત્રો મહામુનિઃ ।
દદર્શ મુનિશાર્દૂલં દ્વારભૂમાવવસ્થિતમ્ ॥ ૧૬॥

કેનાપિ કારણેનોર્વીતલમર્કમુપાગતમ્ ।
બ્રાહ્મેણ તેજસાક્રાન્તં ક્ષાત્રેણ ચ મહૌજસા ॥ ૧૭॥

જરાજરઠયા નિત્યં તપઃપ્રસરરૂક્ષયા ।
જટાવલ્યા વૃતસ્કન્ધં સસન્ધ્યાભ્રમિવાચલમ્ ॥ ૧૮॥

ઉપશાન્તં ચ કાન્તં ચ દીપ્તમપ્રતિઘાતિ ચ ।
નિભૃતં ચોર્જિતાકારં દધાનં ભાસ્વરં વપુઃ ॥ ૧૯॥

પેશલેનાતિભીમેન પ્રસન્નેનાકુલેન ચ ।
ગમ્ભીરેણાતિપુર્ણેન તેજસા રઞ્જિતપ્રભમ્ ॥ ૨૦॥

અનન્તજીવિતદશાસખીમેકામનિન્દિતામ્ ।
ધારયન્તં કરે શ્લક્ષ્ણાં કુણ્ડીમમ્લાનમાનસમ્ ॥ ૨૧॥

કરુણાક્રાન્તચેતસ્ત્વાત્પ્રસન્નૈર્મધુરાક્ષરૈઃ ।
વીક્ષણૈરમૃતેનેવ સંસિઞ્ચન્તમિમાઃ પ્રજાઃ ॥ ૨૨॥

યુક્તોયજ્ઞોપવીતાઙ્ગં ધવલપ્રોન્નતભ્રુવમ્ ।
અનન્તં વિસ્મયં ચાન્તઃ પ્રયચ્છન્તમિવેક્ષિતુઃ ॥ ૨૩॥

મુનિમાલોક્ય ભૂપાલો દૂરાદેવાનતાકૃતિઃ ।
પ્રણનામ ગલન્મૌલિમણિમાનિતભૂતલમ્ ॥ ૨૪॥

મુનિરપ્યવનીનાથં ભાસ્વાનિવ શતક્રતુમ્ ।
તત્રાભિવાદયાઞ્ચક્રે મધુરોદારયા ગિરા ॥ ૨૫॥

તતો વસિષ્ઠપ્રમુખાઃ સર્વ એવ દ્વિજાતયઃ ।
સ્વાગતાદિક્રમેણૈનં પૂજયામાસુરાદૃતાઃ ॥ ૨૬॥

દશરથ ઉવાચ ।
અશઙ્કિતોપનીતેન ભાસ્વતા દર્શનેન તે ।
સાધો સ્વનુગૃહીતાઃ સ્મો રવિણેવામ્બુજાકરાઃ ॥ ૨૭॥

યદનાદિ યદક્ષુણ્ણં યદપાયવિવર્જિતમ્ ।
તદાનન્દસુખં પ્રાપ્તં મયા ત્વદ્દર્શમાન્મુને ॥ ૨૮॥

અદ્ય વર્તામહે નૂનં ધન્યાનાં ધુરિ ધર્મતઃ ।
ભવદાગમનસ્યેમે યદ્વયં લક્ષ્યમાગતાઃ ॥ ૨૯॥

એવં પ્રકથયન્તોઽત્ર રાજાનોઽથ મહર્ષયઃ ।
આસનેષુ સભાસ્થાનમાસાદ્ય સમુપાવિશન્ ॥ ૩૦॥

સ દૃષ્ટ્વા માલિતં લક્ષ્મ્યાભીતસ્તમૃષિસત્તમમ્ ।
પ્રહૃષ્ટવદનો રાજા સ્વયમર્ઘ્યં ન્યવેદયત્ ॥ ૩૧॥

સ રાજ્ઞઃ પ્રતિગૃહ્યાર્ઘ્યં શાસ્ત્રદૃષ્ટેન કર્મણા ।
પ્રદક્ષિણં પ્રકુર્વન્તં રાજાનં પર્યપૂજયત્ ॥ ૩૨॥

સ રાજા પૂજિતસ્તેન પ્રહૃષ્ટવદનસ્તદા ।
કુશલં ચાવ્યયં ચૈવ પર્યપૃચ્છન્નરાધિપમ્ ॥ ૩૩॥

વસિષ્ઠેન સમાગમ્ય પ્રહસ્ય મુનિપુઙ્ગવઃ ।
યથાર્હં ચાર્ચયિત્વૈનં પપ્રચ્છાનામયં તતઃ ॥ ૩૪॥

ક્ષણં યથાર્હમન્યોન્યં પૂજયિત્વા સમેત્ય ચ ।
તે સર્વે હૃષ્ટમનસો મહારાજનિવેશને ॥ ૩૫॥

યતોચિતાસનગતા મિથઃ સંવૃદ્ધતેજસઃ ।
પરસ્પરેણ પપ્રચ્છુઃ સર્વેઽનામયમાદરાત્ ॥ ૩૬॥

ઉપવિષ્ટાય તસ્મૈ સ વિશ્વામિત્રાય ધીમતે ।
પાદ્યમર્ઘ્યં ચ ગાં ચૈવ ભૂયોભૂયો ન્યવેદયત્ ॥ ૩૭॥

અર્ચયિત્વા તુ વિધિવદ્વિશ્વામિત્રમભાષત ।
પ્રાઞ્જલિઃ પ્રયતો વાક્યમિદં પ્રીતમાના નૃપઃ ॥ ૩૮॥

યથાઽમૃતસ્ય સમ્પ્રાપ્તિર્યથા વર્ષમવર્ષકે ।
યથાન્ધસ્યેક્ષણપ્રાપ્તિર્ભવદાગમનં તથા ॥ ૩૯॥

યથેષ્ટદારસમ્પર્કાત્પુત્રજન્માઽપ્રજાવતઃ ।
સ્વપ્નદૃષ્ટાર્થલાભશ્ચ ભવદાગમનં તથા ॥ ૪૦॥

યથેપ્સિતેન સંયોગ ઇષ્ટસ્યાગમનં યથા ।
પ્રણષ્ટસ્ય યથા લાભો ભવદાગમનં તથા ॥ ૪૧॥

યથા હર્ષો નભોગત્યા મૃતસ્ય પુનરાગમાત્ ।
થથા ત્વદાગમાદ્બ્રહ્મન્સ્વાગતં તે મહામુને ॥ ૪૨॥

બ્રહ્મલોકનિવાસો હિ કસ્ય ન પ્રીતિમાવહેત્ ।
મુને તવાગમસ્તદ્વત્સત્યમેવ બ્રવીમિ તે ॥ ૪૩॥

કશ્ચ તે પરમઃ કામઃ કિં ચ તે કરવાણ્યહમ્ ।
પાત્રભૂતોઽસિ મે વિપ્ર પ્રાપ્તઃ પરમધાર્મિકઃ ॥ ૪૪॥

પૂર્વં રાજર્ષિશબ્દેન તપસા દ્યોતિતપ્રભઃ ।
બ્રહ્મર્ષિત્વમનુપ્રાપ્તઃ પૂજ્યોઽસિ ભગવન્મયા ॥ ૪૫॥

ગઙ્ગાજલભિષેકેણ યથા પ્રીતિર્ભવેન્મમ ।
તથા ત્વદ્દર્શનાત્પ્રીતિરન્તઃ શીતયતીવ મામ્ ॥ ૪૬॥

વિગતેચ્છાભયક્રોધો વીતરાગો નિરામયઃ ।
ઇદમત્યદ્ભુતં બ્રહ્મન્યદ્વાન્મામુપાગતઃ । । ૪૭॥

શુભક્ષેત્રગતં ચાહમાત્માનમપકલ્મષમ્ ।
ચન્દ્રબિમ્બ ઇવોન્મગ્નં વેદવેદ્ય વિદાંવર ॥ ૪૮॥

સાક્ષાદિવ બ્રહ્મણો મે તવાભાગમનં મતમ્ ।
પૂતોઽસ્મ્યનુગૃહીતશ્ચ તવાભ્યાગમનાં મુને ॥ ૪૯॥

ત્વદાગમનપુણ્યેન સાધો યદનુરઞ્જિતમ્ ।
અદ્ય મે સફલં જન્મ જીવિતં તત્સુજીવિતમ્ ॥ ૫૦॥

ત્વામિહાભ્યાગતં દૃષ્ટ્વા પ્રતિપૂજ્ય પ્રણમ્ય ચ ।
આત્મન્યેવ નમામ્યન્તર્દૃષ્ટ્વેન્દું જલધિર્યથા ॥ ૫૧॥

યત્કાર્યં યેન વાર્થેન પ્રાપ્તોઽસિ મુનિપુઙ્ગવ ।
કૃતમિત્યેવ તદ્વિદ્ધિ માનોઽસીતિ સદા મમ ॥ ૫૨॥

સ્વકાર્યે ન વિમર્શં ત્વં કર્તુમર્હસિ કૌશિક ।
ભગવન્નાસ્ત્યદેયં મે ત્વયિ યત્પ્રતિપદ્યતે ॥ ૫૩॥

કાર્યસ્ય ન વિચારં ત્વં કર્તુમર્હસિ ધર્મતઃ ।
કર્તા ચાહમશેષં તે દૈવતં પરમં ભવાન્ ॥ ૫૪॥

ઇદમતિમધુરં નિશમ્ય વાક્યં
        શ્રુતિસુખમાત્મવિદા વિનીતમુક્તમ્ ।
પ્રથિતગુણયશા ગુણૈર્વિશિષ્ટં
        મુનિવૃષભઃ પરમં જગામ હર્ષમ્ ॥ ૫૫॥

ઇત્યાર્ષે શ્રીમદવાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે વિશ્વામિત્રાભ્યાગમનં નામ ષષ્ઠઃ સર્ગઃ ॥ ૬

---

સપ્તમઃ સર્ગઃ

શ્રીવાલ્મીકિરુવાચ ।
તચ્છ્રુત્વા રાજસિંહસ્ય વાક્યમદ્ભુતવિસ્તરમ્ ।
હૃષ્ટમાનો મહાતેજા વિશ્વામિત્રોઽભ્યભાષત ॥ ૧॥

સદૃશં રાજશાર્દૂલ તવૈવૈતન્મહીતલે ।
મહાવંશપ્રસૂતસ્ય વસિષ્ઠવશવર્તિનઃ ॥ ૨॥

યત્તુ મે હૃદ્ગતં વાક્યં તસ્ય કાર્યવિનિર્ણયમ્ ।
કુરુ ત્વં રાજશાર્દૂલ ધર્મં સમનુપાલય ॥ ૩॥

અહં ધર્મં સમાતિષ્ઠે સિદ્ધ્યર્થં પુરુષર્ષભ ।
તસ્ય વિઘ્નકરા ઘોરા રાક્ષસા મમ સંસ્થિતાઃ ॥ ૪॥

યદા યદા તુ યજ્ઞેન યજેઽહં વિબુધવ્રજાન્ ।
તદા તદા તુ મે યજ્ઞં વિનિઘ્નન્તિ નિશાચરાઃ ॥ ૫॥

બહુશો વિહિતે તસ્મિન્મયા રાક્ષસનાયકાઃ ।
અકિરસ્તે મહીં યાગે માંસેન રુધિરેણ ચ ॥ ૬॥

અવધૂતે તથાભૂતે તસ્મિન્યાગકદમ્બકે ।
કૃતશ્રમો નિરુત્સાહસ્તસ્માદ્દેશાદુપાગતઃ ॥ ૭॥

ન ચ મે ક્રોધમુત્સ્રષ્ટું બુદ્ધિર્ભવતિ પાર્થિવ ।
તથાભૂતં હિ તત્કર્મ ન શાપસ્તસ્ય વિદ્યતે ॥ ૮॥

ઈદૃશી યજ્ઞદીક્ષા સા મમ તસ્મિન્મહાક્રતૌ ।
ત્વત્પ્રસાદાદવિઘ્નેનપ્રાપયેયં મહાફલમ્ ॥ ૯॥

ત્રાતુમર્હસિ મામાર્તં  શરણાર્થિનમાગતમ્ ।
અર્થિનાં યન્નિરાશત્વં સત્તમેઽભિભવો હિ સઃ ॥ ૧૦॥

તવાસ્તિ તનયઃ શ્રીમાન્દૃપ્તશાર્દૂલવિક્રમઃ ।
મહેન્દ્રસદૃશો વીર્યે રામો રક્ષોવિદારણઃ ॥ ૧૧॥

તં પુત્રં રાજશાર્દૂલ રામં સત્યપરાક્રમમ્ ।
કાકપક્ષધરં શૂરં જ્યેષ્ઠં મે દાતુમર્હસિ ॥ ૧૨॥

શક્તો હ્યેષ મયા ગુપ્તો દિવ્યેન સ્વેન તજસા ।
રાક્ષસા યેઽપકર્તારસ્તેષાં મૂર્ધવિનિગ્રહે ॥ ૧૩॥

શ્રેયશ્ચાસ્ય કરિષ્યામિ બહુરૂપમનન્તકમ્ ।
ત્રયાણામપિ લોકાનાં યેન પૂજ્યો ભવિષ્યતિ ॥ ૧૪॥

ન ચ તે રામમાસાદ્ય સ્થાતું શક્તા નિશાચરાઃ ।
ક્રુદ્ધં કેસરિણં દૃષ્ટ્વા વનરેણ ઇવૈણકાઃ ॥ ૧૫॥

તેષાં ન ચાન્યઃ કાકુસ્થાદ્યોદ્ધુમુત્સહતે પુમાન્ ।
ઋતે કેસરિણઃ ક્રુદ્ધાન્મત્તાનાં કરિણામિવ ॥ ૧૬॥

વીર્યોત્સિક્તા હિ તે પાપાઃ કાલકૂટોપમા રણે ।
ખર્દૂષણયોર્ભૃત્યાઃ કૃતાન્તાઃ કુપિતા ઇવ ॥ ૧૭॥

રામસ્ય રાજશાર્દૂલ સહિષ્યન્તે ન સાયકાન્ ।
અનારતગતા ધારા જલદસ્યેવ પાંસવઃ ॥ ૧૮॥

ન ચ પુત્રકૃતં સ્નેહં કર્તુમર્હસિ પાર્થિવ ।
ન તદસ્તિ જગત્યસ્મિન્યન્ન દેયં મહાત્મનામ્ ॥ ૧૯॥

હન્ત નૂનં વિજાનામિ હતાંસ્તાન્વિદ્ધિ રાક્ષસાન્ ।
નહ્યસ્મદાદયઃ પ્રાજ્ઞાઃ સન્દિગ્ધે સમ્પ્રવૃત્તયઃ ॥ ૨૦॥

અહં વેદ્મિ મહાત્માનં રામં રાજીવલોચનમ્ ।
વસિષ્ઠશ્ચ મહાતેજા યે ચાન્યે દીર્ઘદર્શિનઃ ॥ ૨૧॥

યદિ ધર્મો મહત્ત્વં ચ યશસ્તે મનસિ સ્થિતમ્ ।
તન્મહ્યં સમભિપ્રેતમાત્મજં દાતુમર્હસિ ॥ ૨૨॥

દશરાત્રશ્ચ મે યજ્ઞો યસ્મિન્રામેણ રાક્ષસાઃ ।
હન્તવ્યા વિઘ્નકર્તારો મમ યજ્ઞસ્ય વૈરિણઃ ॥ ૨૩॥

અત્રાભ્યનુજ્ઞાં કાકુત્સ્થ દદતાં તવ મન્ત્રિણઃ ।
વસિષ્ઠપ્રમુખાઃ સર્વે તેન રામં વિસર્જય ॥ ૨૪॥

નાત્યેતિ કાલઃ કાલજ્ઞ યથાયં મમ રાઘવ ।
તથા કુરુષ્વ ભદ્રં તે મા ચ શોકે મનઃ કૃથાઃ ॥ ૨૫॥

કાર્યમણ્વપિ કાલે તુ કૃતમેત્યુપકારતામ્ ।
મહદપ્યુપકારોઽપિ રિક્તતામેત્યકાલતઃ ॥ ૨૬॥

ઇત્યેવમુક્ત્વા ધર્માત્મા ધર્માર્થસહિતં વચઃ ।
વિરરામ મહાતેજા વિશ્વામિત્રો મુનિશ્વરઃ ॥ ૨૭॥

શ્રુત્વા વચો મુનિવરસ્ય મહાનુભાવ-
સ્તૂષ્ણીમતિષ્ઠદુપપન્નપદં સ વક્તુમ્ ।
નો યુક્તિયુક્તકથનેન વિનૈતિ તોષં
ધીમાનપૂરિતમનોઽભિમતશ્ચ લોકઃ ॥ ૨૮॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે

વૈરાગ્યપ્રકરણે વિશ્વામિત્રવાક્યં નામ સપ્તમઃ સર્ગઃ ॥ ૭

---

અષ્ટમઃ સર્ગઃ

વાલ્મીકિરુવાચ
તચ્છ્રુત્વા રાજશાર્દૂલો વિશ્વામિત્રસ્ય ભાષિતમ્ ।
મુહૂર્તમાસીન્નિશ્ચેષ્ટઃ સદૈન્ય ચેતમબ્રવીત્ ॥ ૧॥

ઊનષોડશવર્ષોઽયં રામો રાજીવલોચનઃ ।
ન યુદ્ધયોગ્યતામસ્ય પશ્યામિ સહ રાક્ષસૈઃ ॥ ૨॥

ઇયમક્ષૌહિણી પૂર્ણા યસ્યાઃ પતિરહં પ્રભો ।
તયા પરિવૃતો યુદ્ધં દાસ્યામિ પિશિતાશિનામ્ ॥ ૩॥

ઇમે હિ શૂરા વિક્રાન્તા ભૃત્યા મન્ત્રવિશારદાઃ ।
અહં ચૈષાં ધનુષ્પાણિર્ગોપ્તા સમરમૂર્ધનિ ॥ ૪॥

એભિઃ સહૈવ વીરાણાં મહેન્દ્રમહતામપિ ।
દદામિ યુદ્ધં મત્તાનાં કરિણામિવ કેસરી ॥ ૫॥

બાલો રામસ્ત્વનીકેષુ ન જાનાતિ બલાબલમ્ ।
અન્તઃપુરાદૃતે દૃષ્ટા નાનેનાન્યા રણાવનિઃ ॥ ૬॥

ન શસ્ત્રૈઃ પરમૈર્યુક્તો ન ચ યુદ્ધવિશારદઃ ।
નવાસ્ત્રૈઃ શૂતકોટિનાં તજ્જ્ઞઃ સમરભૂમિષુ ॥ ૭॥

કેવલં પુષ્પખણ્ડેષુ નગરોપવનેષુ ચ ।
ઉદ્યાનવનકુઞ્જેષુ સદૈવ પરિશીલનમ્ ॥ ૮॥

વિવર્તુમેષ જાનાતિ સહ રાજકુમારકૈઃ ।
કીર્ણપુષ્પોપહારાસુ સ્વકાસ્વજિરભૂમિષુ ॥ ૯॥

અદ્ય ત્વતિતરાં બ્રહ્મન્મમ ભાગ્યવિપર્યયાત્ ।
હિમેનેવ હિ પદ્માભઃ સમ્પન્નો હરિણઃ કૃશઃ ॥ ૧૦॥

નાત્તુમન્નાનિ શક્નોતિ ન વિહર્તું ગૃહાવનિમ્ ।
અન્તઃખેદપરીતાત્મા તૂષ્ણીં તિષ્ઠતિ કેવલમ્ ॥ ૧૧॥

સદારઃ સહભૃત્યોઽહં તત્કૃતે મુનિનાયક ।
શરદીવ પયોવાહો નૂનં નિઃસારતાં ગતઃ ॥ ૧૨॥

ઈદૃશોઽસૌ સુતો બાલ આધિનાઽથ વશીકૃતઃ ।
કથં દદામિ તં તુભ્યં યોદ્ધું સહ નિશાચરૈઃ ॥ ૧૩॥

અપિ બાલાઙ્ગનાસઙ્ગાદપિ સાધો સુધારસાત્ ।
રાજ્યાદપિ સુખાયૈવ પુત્રસ્નેહો મહામતે ॥ ૧૪॥

યે દુરન્તા મહારમ્ભાસ્ત્રિષુ લોકેષુ ખેદદાઃ ।
પુત્રસ્નેહેન સન્તોઽપિ કુર્વતે તાનસંશયમ્ ॥ ૧૫॥

અસવોઽથ ધનં દારાસ્ત્યજ્યન્તે માનવૈઃ સુખમ્ ।
ન પુત્રો મુનિશાર્દૂલ સ્વભાવો હ્યેષ જન્તુષુ ॥ ૧૬॥

રાક્ષસાઃ ક્રૂરકર્માણઃ કૂટયુદ્ધવિશારદાઃ ।
રામસ્તાન્યોધયત્વિત્થં યુક્તિરેવાતિદુઃસહા ॥ ૧૭॥

વિપ્રયુક્તો હિ રામેણ મુહૂર્તમપિ નોત્સહે ।
જીવિતું જીવિતાકાઙ્ક્ષી ન રામં નેતુર્મર્હસિ ॥ ૧૮॥

નવવર્ષસહસ્રાણિ મમ જાતસ્ય કૌશિક ।
દુઃખેનોત્પાદિતાસ્ત્વેતે ચત્વારઃ પુત્રકા મયા ॥ ૧૯॥

પ્રધાનભૂતસ્તેષ્વેવ રામઃ કમલલોચનઃ ।
તં વિનેહ ત્રયોઽપ્યન્યે ધારયન્તિ ન જીવિતમ્ ॥ ૨૦॥

સ એવ રામો ભવતા નીયતે રાક્ષસાન્પ્રતિ ।
યદિ તત્પુત્રહીનં ત્વં મૃતમેવાશુ વિદ્ધિ મામ્ ॥ ૨૧॥

ચતુર્ણામાત્મજાનાં હિ પ્રીતિરત્રૈવ મે પરા ।
જ્યેષ્ઠં ધર્મમયં તસ્માન્ન રામં નેતુમર્હસિ ॥ ૨૨॥

નિશાચરબલં હન્તું મુને યદિ તવેપ્સિતમ્ ।
ચતુરઙ્ગસમાયુક્તં મયા સહ બલં નય ॥ ૨૩॥

કિંવીર્યા રાક્ષસાસ્તે તુ કસ્ય પુત્રાઃ કથં ચ તે ।
કિયત્પ્રમાણાઃ કે ચૈવ ઇતિ વર્ણય મે સ્ફુટમ્ ॥ ૨૪॥

કથં તેન પ્રકર્તવ્યં તેષાં રામેણ રક્ષસામ્ ।
મામકૈર્બાલકૈર્બ્રહ્મન્મયા વા કૂટયોધિનામ્ ॥ ૨૫॥

સર્વં મે શંસ ભગવન્યથા તેષાં મહારણે ।

સ્થાતવ્યં દુષ્ટભાગ્યાનાં વીર્યોત્સિક્તા હિ રાક્ષસાઃ ॥ ૨૬॥

શ્રૂયતે હિ મહાવીર્યો રાવણો નામ રાક્ષસઃ ।
સાક્ષાદ્વૈશ્રવણભ્રાતા પુત્રો વિશ્રવસો મુનેઃ ॥ ૨૭॥

સ ચેત્તવ મખે વિઘ્નં કરોતિ કિલ દુર્મતિઃ ।
તત્સઙ્ગ્રામે ન શક્તાઃ સ્મો વયં તસ્ય દુરાત્મનઃ ॥ ૨૮॥

કાલે કાલે પૃથબ્રહ્મન્ભૂરિવીર્યવિભૂતયઃ ।
ભૂતેષ્વભ્યુદયં યાન્તિ પ્રલીયતે ચ કાલતઃ ॥ ૨૯॥

અદ્યાસ્મિંસ્તુ વયં કાલ  રાવણાદિષુ શત્રુષુ ।
ન સમર્થાઃ પુરઃ સ્થાતું નિયતેરેષ નિશ્ચયઃ ॥ ૩૦॥

તસ્માત્પ્રસાદં ધર્મજ્ઞ કુરુ ત્વં મમ પુત્રકે ।
મમ ચૈવાલ્પભાગ્યસ્ય ભવાન્હિ પરદૈવતમ્ ॥ ૩૧॥

દેવદાનવગન્ધર્વા યક્ષાઃ પતગપન્નગાઃ ।
નશક્તા રાવણં યોદ્ધું કિં પુનઃ પુરુષા યુધિ ॥ ૩૨॥

મહાવીર્યવતાં વીર્યમાદત્તે યુધિ રાક્ષસઃ ।
તેન સાર્ધં ન શક્તાઃ સ્મ સંયુગે તસ્ય બાલકૈઃ ॥ ૩૩॥

અયમન્યતમઃ કાલઃ પેલવીકૃતસજ્જનઃ ।
રાઘવોઽપિ ગતો દૈન્યં યતો વાર્ધકજર્જરઃ ॥ ૩૪॥

અથવા લવણં બ્રહ્મન્યજ્ઞઘ્નં તં મધોઃ સુતમ્ ।
કથયત્વસુરપ્રખ્યં નૈવ મોક્ષ્યામિ પુત્રકમ્ ॥ ૩૫॥

સુન્દોપસુન્દયોશ્ચૈવ પુત્રૌ વૈવસ્વતોપમૌ ।
યજ્ઞવિઘ્નકરૌ બ્રૂહિ ન તે દાસ્યામિ પુત્રકમ્ ॥ ૩૬॥

અથ નેષ્યસિ ચેત્બ્રહ્મંસ્તદ્ધતોઽસ્મ્યહમેવ તે ।
અન્યથા તુ ન પશ્યામિ શાશ્વતં જયમાત્મનઃ ॥ ૩૭॥

ઇત્યુક્ત્વા મૃદુ વચનં રઘૂદ્વહોઽસૌ
        કલ્લોલે મુનિમતસંશયે નિમગ્નઃ ।
નાજ્ઞાસીત્ક્ષણમપિ નિશ્ચયં મહાત્મા
        પ્રોદ્વીચાવિવ જલધૌ સ મુહ્યમાનઃ ॥ ૩૮॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે

વૈરાગ્યપ્રકરણે દશરથવાક્યં નામ અષ્ટમઃ સર્ગઃ ॥ ૮॥

---

નવમઃ સર્ગઃ

વાલ્મીકિરુવાચ
તચ્છ્રુત્વા વચનં તસ્ય સ્નેહપર્યાકુલેક્ષણમ્ ।
સમન્યુઃ કૌશિકો વાક્યં પ્રત્યુવાચ મહીપતિમ્ ॥ ૧॥

કરિષ્યામિતિ સંશ્રુત્ય પ્રતિજ્ઞાં હાતુમર્હસિ ।
સ ભવાન્કેસરી ભૂત્વા મૃગતામિવ વાઞ્છસિ ॥ ૨॥

રાઘવાણામયુક્તોઽયં કુલસ્યાસ્ય વિપર્યયઃ ।
ન કદાચન જાયન્તે શીતાંશોરુષ્ણરશ્મયઃ ॥ ૩॥

યદિ ત્વં ન ક્ષમો રાજન્ગમિષ્યામિ યથાગતમ્ ।
હીનપ્રતિજ્ઞ કાકુત્સ્થ સુખી ભવ સબાન્ધવઃ ॥ ૪॥

વાલ્મીકિરુવાચ
તસ્મિન્કોપપરીતેઽથ વિશ્વામિત્રે મહાત્મનિ ।
ચચાલ વસુધા કૃત્સ્ના સુરાંશ્ચ ભયમાવિશત્ ॥ ૫॥

ક્રોધાભિભૂતં વિજ્ઞાય જગન્મિત્રં મહામુનિમ્ ।
ધૃતિમાન્સુવ્રતો ધીમાન્વસિષ્ઠો વાક્યમબ્રવીત્ ॥ ૬॥

વસિષ્ઠ ઉવાચ ।
ઇક્ષ્કવાકૂણાં કુલે જાતઃ સાક્ષાદ્ધર્મ ઇવાપરઃ ।
ભવાન્દશરથઃ શ્રીમાંસ્ત્રૈલોક્યગુણભૂષિતઃ ॥ ૭॥

ધૃતિમાન્સુવ્રતો ભૂત્વા ન ધર્મં હાતુમર્હસિ ।
ત્રિષુ લોકેષુ વિખ્યાતો ધર્મેણ યશસા યુતઃ ॥ ૮॥

સ્વધર્મં  પ્રતિપદ્યસ્વ ન ધર્મં હાતુમર્હસિ ।
મુનેસ્ત્રિભુવનેશસ્ય વચનં કર્તુમર્હસિ ॥ ૯॥

કરિષ્યામીતિ સંશ્રુત્ય તત્તે રાજન્નકુર્વતઃ ।
ઇષ્ટાપૂર્તં હરેદ્ધર્મં તસ્માદ્રામં વિસર્જય ॥ ૧૦॥

ઇક્ષ્વાકુવંશજાતોઽપિ સ્વયં દશરથોઽપિ સન્ ।
ન પાલયસિ દેદ્વાક્યં કોઽપરઃ પાલયિષ્યતિ ॥ ૧૧॥

યુષ્મદાદિપ્રણીતેન વ્યવહારેણ જન્તવઃ ।
મર્યાદાં ન વિમુઞ્ચન્તિ તાં ન હાતું ત્વમર્હસિ ॥ ૧૨॥

ગુપ્તં પુરુષસિંહેન જ્વલનેનામૃતં યથા ।
કૃતાસ્ત્રમકૃતાસ્ત્રં વા નૈનં શક્ષ્યન્તિ રાક્ષસાઃ ॥ ૧૩॥

એષ વિગ્રહવાન્ધર્મ એષ વીર્યવતાં વરઃ ।
એષ બુદ્ધ્યાઽધિકો લોકે તપસાં ચ પરાયણમ્ ॥ ૧૪॥

એષોઽસ્ત્રં વિવિધં વેત્તિ ત્રૈલોક્યે સચરાચરે ।
નૈતદન્યઃ પુમાન્વેત્તિ ન ચ વેત્સ્યતિ કશ્ચન ॥ ૧૫॥

ન દેવા નર્ષયઃ કેચિન્નાસુરા ન ચ રાક્ષસાઃ ।
ન નાગા યક્ષગન્ધર્વાઃ સમેતાઃ સદૃશા મુનેઃ ॥ ૧૬॥

અસ્ત્રમસ્મૈ કૃશાશ્વેન પરૈઃ પરમદુર્જયમ્ ।
કૌશિકાય પુરા દત્તં યદા રાજ્યં સમન્વગાત્ ॥ ૧૭॥

તે હિ પુત્રાઃ કૃશાશ્વસ્ય પ્રજાપતિસુતોપમાઃ ।
એનમન્વચરન્વીરા દીપ્તિમન્તો મહૌજસઃ ॥ ૧૮॥

જયા ચ સુપ્રભ ચૈવ દાક્ષાયણ્યૌ સુમધ્યમે ।
તથોસ્તુ યાન્યપત્યાનિ શતં પરમદુર્જયમ્ ॥ ૧૯॥

પઞ્ચાશતં સુતાઞ્જજ્ઞે જયા લબ્ધવરા પુરા ।
વધાર્થં સુરસૈન્યાનાં તે ક્ષમાઃ કામચારિણઃ ॥ ૨૦॥

સુપ્રભા જનયામાસ પુત્રાન્પઞ્ચાશતં પરાન્ ।
સઙ્ઘર્ષાન્નામ દુર્ધર્વાન્દુરાકારાન્બલીયસઃ ॥ ૨૧॥

એવંવીર્યો મહાતેજા વિશ્વામિત્રો જગન્મુનિઃ ।
ન રામગમને બુદ્ધિં વિક્લવાં કર્તુમર્હસિ ॥ ૨૨॥

અસ્મિન્મહાસત્ત્વતમે મુનીન્દ્રે
        સ્થિતે સમીપે પુરુષસ્ય સાધો ।
પ્રાપ્તેઽપિ મૃત્યાવમરત્વમેતિ
        મા દીનતાં ગચ્છ યથા વિમૂઢઃ ॥ ૨૩॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે વસિષ્ઠસમાશ્વાસનં નામ નવમઃ સર્ગઃ ॥ ૯॥

દશમઃ સર્ગઃ

વાલ્મીકિરુવાચ
તથા વસિષ્ઠે બ્રુવતિ રાજા દશરથઃ સુતમ્ ।
સમ્પ્રહૃષ્ટમના રામમાજુહાવ સલક્ષ્મણમ્ ॥ ૧॥

દશરથ ઉવાચ ।
પ્રતિહાર મહાબાહું રામં સત્યપરાક્રમમ્ ।
સલક્ષ્મણમવિઘ્નેન પુણ્યાર્થં શીઘ્રમાનય ॥ ૨॥

ઇતિ રાજ્ઞા વિસૃષ્ટોઽસૌ ગત્વાન્તઃપુરમન્દિરમ્ ।
મુહૂર્તમાત્રેણાગત્ય સમુવાચ મહીપતિમ્ ॥ ૩॥

દેવ દોર્દલિતાશેષરિપો રામઃ સ્વમન્દિરે ।
વિમનાઃ સંસ્થિતો રાત્રૌ ષટ્પદઃ કમલે યથા ॥ ૪॥

આગચ્છામિ ક્ષણેનેતિ વક્તિ ધ્યાયતિ ચૈકતઃ ।
ન કસ્યચિચ્ચ નિકટે સ્થાતુમિચ્છતિ ખિન્નધીઃ ॥ ૫॥

ઇત્યુક્તસ્તેન ભૂપાલસ્તં રામાનુચરં જનમ્ ।
સર્વમાશ્વાસયામાસ પપ્રચ્છ ચ યથાક્રમમ્ ॥ ૬॥

કથં કીદૃગ્વિધો રામ ઇતિ પૃષ્ટો મહીભૃતા ।
રામભૃત્યજનઃ ખિન્નો વાક્યમાહ પહીપતિમ્ ॥ ૭॥

દેહયષ્ટિમિમાં દેવ ધારયન્ત ઇમે વયમ્ ।
ખિન્નાઃ ખેદે પરિમ્લાનતનૌ રામે સુતે તવ ॥ ૮॥

રામો રાજીવપત્રાક્ષો યતઃપ્રભૃતિ ચાગતઃ ।
સવિપ્રસ્તીર્થયાત્રાયાસ્તતઃપ્રભૃતિ દુર્મનાઃ ॥ ૯॥

યત્નપ્રાર્થનયામાસ્કં નિજવ્યાપારમાહ્નિકમ્ ।
સોઽયમામ્લાનવદનઃ કરોતિ ન કરોતિ વા ॥ ૧૦॥

સ્નાનદેવાર્ચનાદાનભોજનાદિષુ દુર્મનાઃ ।
પ્રાર્થિતોઽપિ હિ નાતૃપ્તેરશ્નાત્યશનમીશ્વરઃ ॥ ૧૧॥

લોલાન્તઃપુરનારીભિઃ કૃતદોલાભિરઙ્ગણે ।
નચ ક્રીડતિ લીલાભિર્ધારાભિરિવ ચાતકઃ ॥ ૧૨॥

માણિક્યમુકુલપ્રોતા કેયૂરકટકાવલિઃ ।
નાનન્દયતિઉ તં રાજન્દ્યૌઃ પાતવિષયં યથા ॥ ૧૩॥

ક્રીડદ્વધૂવિલોકેષુ વહત્કુસુમવાયુષુ ।
લતાવલયગેહેષુ ભવત્યતિ વિષાદવાન્ ॥ ૧૪॥

યદ્દ્રવ્યમુચિતં સ્વાદુ પેશલં ચિત્તહારિ ચ ।
બાષ્પપૂર્ણેક્ષણ એવ તેનૈવ પરિખિદ્યતે ॥ ૧૫॥

કિમિમા દુઃખદાયિન્યં પ્રસ્ફુરન્તીઃ પુરાઙ્ગનાઃ ।
ઇતિ નૃત્તવિલાસેષુ કામિનીઃ પરિનિન્દતિ । ૧૬॥

ભોજનં શયનં યાનં વિલાસં સ્નાનમાસનમ્ ।
ઉન્માત્તચેષ્ટિત ઇવ નાભિનન્દત્યનિન્દિતમ્ ॥ ૧૭॥

કિં સમ્પદા કિં વિપદા કિં ગેહેન કિમિઙ્ગિતૈઃ ।
સર્વમેવાસદિત્યુક્ત્વા તૂષ્ણીમેકોઽવતિષ્ઠતે ॥ ૧૮॥

નોદેતિ પરિહાસેષુ ન ભોગેષુ નિમજ્જતિ ।
ન ચ તિષ્ઠતિ કાર્યેષુ મૌનમેવાવલમ્બતે ॥ ૧૯॥

વિલોલાલકવલ્લર્યો હેલાવલિતલોચનાઃ ।
નાનન્દયન્તિ તં નાર્યો મૃગ્યો વનતરું યથા ॥ ૨૦॥

એકાન્તેષુ દિગન્તેષુ તીરેષુ વિપિનેષુ ચ ।
રતિમાયાત્યરણ્યેષુ વિક્રીત ઇવ જન્તુષુ ॥ ૨૧॥

વસ્ત્રપાનાશનાદાનપરાઙ્મુખતયા તયા ।
પરિવ્રાડ્ધર્મિણં ભૂપ સોઽનુયાતિ તપસ્વિનમ્ ॥ ૨૨॥

એક એવ વસન્દેશે જનશૂન્યે જનેશ્વર ।
ન હસત્યેકયા બુદ્ધ્યા ન ગાયતિ ન રોદિતિ ॥ ૨૩॥

બદ્ધપદ્માસનઃ શૂન્યમના વામકરસ્થલે ।
કપોલતલમાધાય કેવલં પરિતિષ્ઠતિ ॥ ૨૪॥

નાભિમાનમુપાદત્તે નચ વાઞ્છતિ રાજતામ્ ।
નોદેતિ નાસ્તમાયાતિ સુખદુઃખાનુવૃત્તિષુ ॥ ૨૫॥

ન વિદ્મઃ કિમસૌ યાતિ કિં કરોતિ કિમીહતે ।
કિં ધ્યાયતિ કિમાયાતિ કથં કિમનુધાવતિ ॥ ૨૬॥

પ્રત્યહં કૃશતામેતિ પ્રત્યહં યાતિ પાણ્ડુતામ્ ।
વિરાગં પ્રત્યહં યાતિ શરદન્ત એવ દ્રુમઃ ॥ ૨૭॥

અનુયાતૌ તથૈવૈતૌ રાજચ્છત્રુઘ્નલક્ષ્મણૌ ।
તાદૃશાવેવ તસ્યૈવ પ્રતિબિમ્બાવિવ સ્થિતૌ ॥ ૨૮॥

ભૃત્યૈ રાજભિરમ્બાભિઃ સમ્પૃષ્ટોઽપિ પુનઃ પુનઃ ।
ઉક્ત્વા ન કિઞ્ચિદેવેતિ તૂષ્ણીમાસ્તે નિરીહિતઃ ॥ ૨૯॥

આપાતમાત્રહૃદ્યેષુ મા ભોગેષુ મનઃ કૃથાઃ ।
ઇતિ પાર્શ્વગતં ભવ્યામનુશાસ્તિ સુહૃજ્જનમ્ ॥ ૩૦॥

નાનાવિભવરમ્યાસુ સ્ત્રીષુ ગોષ્ઠીગતાસુ ચ ।
પુરસ્થિતમિવાસ્નેહો નાશમેવાનુપશ્યતિ ॥ ૩૧॥

નીતમાયુરનાયાસપદપ્રાપ્તિવિવર્જિતૈઃ ।
ચેષ્ટિતૈરિતિ કાકલ્યા ભૂયોભૂયઃ પ્રગાયતિ ॥ ૩૨॥

સમ્રાડ્ભવેતિ પાર્શ્વસ્થં વદન્તમનુજીવિનમ્ ।
પ્રલપન્તમિવોન્મત્તં હસત્યન્યમના મુનિઃ ॥ ૩૩॥

ન પ્રોક્તમાકર્ણયતિ ઈક્ષતે ન પુરોગતમ્ ।
કરોત્યવજ્ઞાં સર્વત્ર સુસમેત્યાપિ વસ્તુનિ ॥ ૩૪॥

અપ્યાકાશસરોજિન્યા અપ્યાકાશમહાવને ।
ઇત્થમેતન્મન ઇતિ વિસ્મયોઽસ્ય ન જાયતે ॥ ૩૫॥

કાન્તામધ્યગતસ્યાપિ મનોઽસ્ય મદનેષવઃ ।
ન ભેદયન્તિ દુર્ભેદ્યં ધારા ઇવ મહોપલમ્ ॥ ૩૬॥

આપદામેકમાવાસમભિવાઞ્છસિ કિં ધનમ્ ।
અનુશિષ્યેતિ સર્વસ્વમર્થિને સમ્પ્રયચ્છતિ ॥ ૩૭॥

ઇયામાપદિયં સમ્પદિત્યેવં કલ્પનામયઃ ।
મનસોઽભુદિતો મોહ ઇતિ શ્લોકાન્પ્રગાયતિ ॥ ૩૮॥

હા હતોઽહમનાથોઽહમિત્યાક્રન્દપરોઽપિ સન્ ।
ન્ જનો યાતિ વૈરાગ્યં ચિત્રમિત્યેવ વક્ત્યસૌ ॥ ૩૯॥

રઘુકાનનશાલેન રામેણ રિપુઘાતિના ।

ભૃશમિત્થં સ્થિતેનૈવ વયં ખેદમુપાગતાઃ ॥ ૪૦॥

ન વિદ્મઃ કિં મહાબાહો તસ્ય તાદૃશચેતસઃ ।
કુર્મઃ કમલપત્રાક્ષ ગતિરત્ર હિ નો ભવાન્ ॥ ૪૧॥

રાજાનમથવા વિપ્રમુપદેષ્ટારમગ્રતઃ ।
હસત્યજ્ઞમિવાવ્યગ્રઃ સોઽવધીરયતિ પ્રભો ॥ ૪૨॥

યદેવેદમિદં સ્ફારં જગન્નામ યદુત્થિતમ્ ।
નૈતદ્વસ્તુ નચૈવાહમિતિ નિર્ણીય સંસ્થિતઃ ॥ ૪૩॥

નારૌ નાત્મનિ નો મિત્રે ન રાજ્યે ન ચ માતરિ ।
ન સમ્પદા ન વિપદા તસ્યાસ્થા ન વિભો બહિઃ ॥ ૪૪॥

નિરસ્તાસ્થો નિરાશોઽસૌ નિરીહોઽસૌ નિરાસ્પદઃ ।
ન મૂઢો ન ચ મુક્તોઽસૌ તેન તપ્યામહે ભૃશમ્ ॥ ૪૫॥

કિં ધનેન કિમમ્બાભિઃ કિં રાજ્યેન કિમીહયા ।
ઇતિ નિશ્ચયવાનન્તઃ પ્રાણત્યાગપરઃ સ્થિતઃ । ॥ ૪૬॥

ભોગેઽપ્યાયુષિ રાજ્યેષુ મિત્રે પિતરિ માતરિ ।
પરમુદ્વેગમાયાતશ્ચાતકોઽવગ્રહે યથા ॥ ૪૭॥

ઇતિ તોકે સમાયાતાં શાખાપ્રસરશાલિનીમ્ ।
આપત્તામલમુદ્ધર્તું સમુદેતુ દયાપરઃ ॥ ૪૮॥

તસ્ય તાદૃક્સ્વભાવસ્ય સમગ્રવિભવાન્વિતમ્ ।
સંસારજાલમાભોગિ પ્રભો પ્રતિવિષાયતે ॥ ૪૯॥

ઈદૃશઃ સ્યાન્મહાસત્ત્વઃ ક ઇવસ્મિન્મહીતલે ।
પ્રકૃતે વ્યવહારે તં યો નિવેશયિતું ક્ષમઃ ॥ ૫૦॥

મનસિ મોહમપાસ્ય મહામનાઃ
        સકલમાર્તિતમઃ કિલ સાધુતામ્ ।
સફલતાં નયતીહ તમો હરન્
        દિનકરો ભુવિ ભાસ્કરતામિવ ॥ ૫૧॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે રાઘવવિષાદો નામ દશમઃ સર્ગઃ ॥ ૧૦॥

એકાદશઃ સર્ગઃ

વિશ્વામિત્ર ઉવાચ ।

એવં ચેત્તન્મહાપ્રાજ્ઞા ભવન્તો રઘુનન્દનમ્ ।
ઇહાનયન્તુ ત્વરિતા હરિણં હરિણા ઇવ ॥ ૧॥

એષ મોહો રઘુપતેર્નાપદ્ભ્યો ન ચ રાગતઃ ।
વિવેકવૈરાગ્યવતો બોધ એવ મહોદયઃ ॥ ૨॥

ઇહયાતુ ક્ષણાદ્રામ ઇહ ચૈવ વયં ક્ષણાત્ ।
મોહં તસ્યાપનેષ્યામો મારુતોઽદ્રેર્ઘનં યથા ॥ ૩॥

એતસ્મિન્માર્જિતે યુક્ત્યા મોહે સ રઘુનન્દનઃ ।
વિશ્રાન્તિમેષ્યતિ પદે તસ્મિન્વયમિવોત્તમે ॥ ૪॥

સત્યતાં મુદિતાં પ્રજ્ઞાં વિશ્રાન્તિમપતાપતામ્ ।
પીનતાં વરવર્ણત્વ પીતામૃત ઇવૈષ્યતિ ॥ ૫॥

નિજાં ચ પ્રકૃતામેવ વ્યવહારપરમ્પરામ્ ।
પરિપૂર્ણમના માન્ય આચરિષ્યત્યખણ્ડિતમ્ ॥ ૬॥

ભવિષ્યતિ મહાસત્ત્વો જ્ઞાતલોકપરાવરઃ ।
સુખદુઃખદશાહીનઃ સમલોષ્ટાશ્મકાઞ્ચનઃ ॥ ૭॥

ઇત્યુક્તે મુનિનાથેન રાજા સમ્પૂર્ણમાનસઃ ।
પ્રાહિણોદ્રામમાનેતું ભૂયો દૂતપરમ્પરામ્ ॥ ૮॥

એતાવતાથ કાલેન રામો નિજગૃહાસનાત્ ।
પિતુઃ સકાશમાગન્તુમુત્થિતોઽર્ક ઇવાચલાત્ ॥ ૯॥

વૃતઃ કતિપયૈર્ભૃત્યૈર્ભ્રાતૃભ્યાં ચ જગામ હ ।
તત્પુણ્યં સ્વપિતુઃ સ્થાનં સ્વર્ગં સુરપતેરિવ ॥ ૧૦॥

દૂરાદેવ દદર્શાસૌ રામો દશરથં તદા ।
વૃતં રાજસમૂહેન દેવૌઘેનેવ વાસવમ્ ॥ ૧૧॥

વસિષ્ઠવિશ્વમિત્રાભ્યાં સેવિતં પાર્શ્વયોર્દ્વયોઃ ।
સવશાસ્ત્રાર્થતજ્જ્ઞેન મન્ત્રિવૃન્દેન માલિતમ્ ॥ ૧૨॥

ચારુચામરહસ્તાભિઃ કાન્તાભિઃ સમુપાસિતમ્ ।

કકુબ્ભિરિવ મૂર્તાભિઃ સંસ્થિતાભિર્યથોચિતમ્ ॥ ૧૩॥

વસિષ્ઠવિશ્વામિત્રાદ્યાસ્તથા દશરથાદયઃ ।
દદૃશૂ રાઘવં દુરાદુપાયાન્તં ગુહોપમમ્ ॥ ૧૪॥

સત્ત્વાવષ્ટબ્ધગર્ભેણ શૈત્યેનેવ હિમાચલમ્ ।
શ્રિતં સકલસેવ્યેન ગમ્ભીરેણ સ્ફુટેન ચ । ॥ ૧૫॥

સૌમ્યં સમં શુભાકારં વિનયોદારમાનસમ્ ।
કાન્તોપશાન્તવપુષં પરસ્યાર્થસ્ય ભાજનમ્ ॥ ૧૬॥

સમુદ્યદ્યૌવનારમ્ભં વૃદ્ધોપશમશોભનમ્ ।
અનુદ્વિગ્નમનાનન્દં પૂર્ણપ્રાયમનોરથમ્ ॥ ૧૭॥

વિચારિતજગદ્યાત્રં પવિત્રગુણગોચરમ્ ।
મહાસત્ત્વૈકલોભેન ગુણૈરિવ સમાશ્રિતમ્ ॥ ૧૮॥

ઉદારમાર્યમાપૂર્ણમન્તઃ કરણકોટરમ્ ।
અવિક્ષુભિતયા વૃત્ત્યા દર્શયન્તમનુત્તમમ્ ॥ ૧૯॥

એવઙ્ગુણગણાકીર્ણો દૂરાદેવ રઘૂદ્વહઃ ।
પરિમેયસ્મિતાચ્છાચ્છસ્વહારામ્બરપલ્લવઃ ॥ ૨૦॥

પ્રણનામ ચલચ્ચારુચૂડામણિમરીચિના ।
શિરસા વસુધાકમ્પલોલદેવાચલશ્રિયા ॥ ૨૧॥

એવં મુનીન્દ્રે બ્રુવતિ પિતુઃ પાદાભિવન્દનમ્ ।
કર્તુમભ્યાજગામાથ રામઃ કમલલોચનઃ ॥ ૨૨॥

પ્રથમં પિતરં પશ્ચાન્મુની માન્યૈકમાનિતૌ ।
તતો વિપ્રાંસ્તતો બન્ધુંસ્તતો ગુરુગણાન્સુહૃત્ ॥ ૨૩॥

જગ્રાહ ચ તતો દૃષ્ટ્યા મનાઙ્મૂર્ધ્ના તથા ગિરા ।
રાજલોકેન વિહિતાં તાં પ્રણામપરમ્પરામ્ ॥ ૨૪॥

વિહિતાશીર્મુનિભ્યાં તુ રામઃ સુસમમાનસઃ ।
આસસાદ પિતુઃ પુણ્યં સમીપં સુરસુન્દરઃ ॥ ૨૫॥

પાદાભિવન્દનપરં તમથાસૌ મહીપતિઃ ।
શિરસ્યભ્યાલિલિઙ્ગાશુ ચુચુમ્બ ચ પુનઃ પુનઃ ॥ ૨૬॥

શત્રુઘ્નં લક્ષ્મણં ચૈવ તથૈવ પરવીરહા ।
આલિલિઙ્ગ ઘનસ્નેહો રાજહંસોઽમ્બુજે યથા ॥ ૨૭॥

ઉત્સઙ્ગે પુત્ર તિષ્ઠેતિ વદત્યથ મહીપતૌ ।
ભૂમૌ પરિજનાસ્તીર્ણે સોંઽશુકેઽથ ન્યવિક્ષત ॥ ૨૮॥

રાજોવાચ ।
પુત્ર પ્રાપ્તવિવેકસ્ત્વં કલ્યાણાનાં ચ ભાજનમ્ ।
જડવજ્જિર્ણયા બુદ્ધ્યા ખેદાયાત્મા ન દીયતામ્ ॥ ૨૯॥

વૃદ્ધવિપ્રગુરુપ્રોક્તં ત્વાદૃશેનાનુતિષ્ઠતા ।
પદમાસાદ્યતે પુણ્યં ન મોહમનુધાવતા ॥ ૩૦॥

તાવદેવાઽઽપદો દૂરે તિષ્ઠન્તિ પરિપેલવાઃ ।
યાવદેવ ન મોહસ્ય પ્રસરઃ પુત્ર દીયતે ॥ ૩૧॥

શ્રીવસિષ્ઠ ઉવાચ ।
રાજપુત્ર મહાબાહો શૂરસ્ત્વં વિજિતાસ્ત્વયા ।
દુરુચ્છેદા દુરારમ્ભા અપ્યમી વિષયારયઃ ॥ ૩૨॥

કિમતજ્જ્ઞ ઇવાજ્ઞાનાં યોગ્યે વ્યામોહસાગરે ।
વિનિમજ્જસિ કલ્લોલબહુલે જાડ્યશાલિનિ ॥ ૩૩॥

વિશ્વામિત્ર ઉવાચ ।
ચલન્નીલોત્પલાવ્યૂહસમલોચનલોલતામ્ ।
બ્રૂહિ ચેતઃકૃતાં ત્યક્ત્વા હેતુના કેન મુહ્યસિ ॥ ૩૪॥

કિંનિષ્ઠાઃ કે ચ તે કેન કિયન્તઃ કારણેન તે ।
આધયઃ પ્રવિલુમ્પન્તિ મનો ગેહમિવાખવઃ ॥ ૩૫॥

મન્યે નાનુચિતાનાં ત્વમાધીનાં પદમુત્તમમ્ ।
આપત્સુ ચાઽપ્રયોજ્યં તે નિહીના અપિ ચાધયઃ ॥ ૩૬॥

યથાભિમતમાશુ ત્વં બ્રૂહિ પ્રાપ્સ્યસિ ચાનઘ ।
સર્વમેવ પુનર્યેન ભેત્સ્યન્તે ત્વાં તુ નાધયઃ ॥ ૩૭॥

ઇત્યુક્તમસ્ય સુમતે રઘુવંશકેતુ-
રાકર્ણ્ય વાક્યમુચિતાર્થવિલાસગર્ભમ્ ।
તત્યાજ ખેદમભિગર્જતિ વારિવાહે

બર્હી યથા ત્વનુમિતાભિમતાર્થસિદ્ધિઃ ॥ ૩૮॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે રાઘવસમાશ્વાસનં નામૈકાદશઃ સર્ગઃ॥

૧૧॥

---

દ્વાદશઃ સર્ગઃ

વાલ્મીકિરુવાચ ।

ઇતિ પૃષ્ટો મુનીન્દ્રેણ સમાશ્વસ્ય ચ રાઘવઃ ।
ઉવાચ વચનં ચારુ પરિપૂર્ણાર્થમન્થરમ્ ॥ ૧॥

શ્રીરામ ઉવાચ ।
ભગવન્ભવતા પૃષ્ટો યથાવદધુનાઽખિલમ્ ।
કથયામ્યહમજ્ઞોઽપિ કો લઙ્ઘયતિ સદ્વચઃ ॥ ૨॥

અહં તાવદયં જાતો નિજેઽસ્મિન્પિતૃસદ્મનિ ।
ક્રમેણ વૃદ્ધિં સમ્પ્રાપ્તઃ પ્રાપ્તવિદ્યશ્ચ સંસ્થિતઃ ॥ ૩॥

તતઃ સદાચારપરો ભૂત્વાહં મુનિનાયક ।
વિહૃતસ્તીર્થયાત્રાર્થમુર્વીમમ્બુધિમેખલામ્ ॥ ૪॥

એતાવતાથ કાલેન સંસારાસ્થામિમાં હરન્ ।
સમુદ્ભૂતો મનસિ મે વિચારઃ સોઽયમીદૃશઃ ॥ ૫॥

વિવેકેન પરીતાત્મા તેનાહં તદનુ સ્વયમ્ ।
ભોગનીરસયા બુદ્ધ્યા પ્રવિચારિતવાદિનમ્ ॥ ૬॥

કિંનામેદં બત સુખં યેયં સંસારસન્તતિઃ ।
જાયતે મૃતયે લોકો મ્રિયતે જનનાય ચ । ॥ ૭॥

અસ્થિરાઃ સર્વ એવેમે સચરાચરચેષ્ટિતાઃ ।
આપદાં પતયઃ પાપા ભાવા વિભવભૂમયઃ ॥ ૮॥

અયઃશલાકાસદૃશાઃ પરસ્પરમસઙ્ગિનઃ ।
શ્લિષ્યન્તે કેવલં ભાવા મનઃકલ્પનયા સ્વયા ॥ ૯॥

મનઃસમાયત્તમિદં જગદાભોગિ દૃશ્યતે ।

મનશ્ચાસદિવાભાતિ કેન સ્મ પરિમોહિતાઃ ॥ ૧૦॥

અસતૈવ વયં કષ્ટં વિકૃષ્ટા મૂઢબુદ્ધયઃ ।
મૃગતૃષ્ણામ્ભસા દૂરે વને મુગ્ધમૃગા ઇવ ॥ ૧૧॥

ન કેનચિચ્ચ વિક્રીતા વિક્રીતા એવ સંસ્થિતાઃ ।
બત મૂઢા વયં સર્વે જાનાના અપિ શામ્બરમ્ ॥ ૧૨॥

કિમેતેષુ પ્રપઞ્ચેષુ ભોગા નામ સુદુર્ભગાઃ ।
મુધૈવ હિ વયં મોહાત્સંસ્થિતા બદ્ધભાવનાઃ ॥ ૧૩॥

આ જ્ઞાતં બહુકાલેન વ્યર્થમેવ વયં વને ।
મોહે નિપતિતા મુગ્ધાઃ શ્વભ્રે મુગ્ધા મૃગા ઇવ ॥ ૧૪॥

કિં મે રાજ્યેન કિં ભોગૈઃ કોઽહં કિમિદમાગતમ્ ।
યન્મિથ્યૈવાસ્તુ તન્મિથ્યા કસ્ય નામ કિમાગતમ્ ॥ ૧૫॥

એવં વિમૃશતો બ્રહ્મન્સર્વેષ્વેવ તતો મમ ।
ભાવેષ્વરતિરાયાતા પથિકસ્ય મરુષ્વિવ ॥ ૧૬॥

તદેતદ્ભગવન્બ્રૂહિ કિમિદં પરિણશ્યતિ ।
કિમિદં જાયતે ભૂયઃ કિમિદં પરિવર્ધતે ॥ ૧૭॥

જરામરણમાપચ્ચ જનનં સમ્પદસ્તથા ।
આવિર્ભાવતિરોભાવૈર્વિવર્ધન્તે પુનઃ પુનઃ ॥ ૧૮॥

ભોગૈસ્તૈરેવ તૈરેવ તુચ્છાઇર્વયમમી કિલ ।
પશ્ય જર્જરતાં નીતા વાતૈરિવ ગિરિદ્રુમાઃ ॥ ૧૯॥

અચેતના ઇવ જનાઃ પવનૈઃ પ્રાણનામભિઃ ।
ધ્વનન્તઃ સંસ્થિતા વ્યર્થં યથા કીચકવેણવઃ ॥ ૨૦॥

શામ્યતીદં કથં દુઃખમિતિ તપ્તોઽસ્મિ ચિન્તયા ।
જરદ્દ્રુમ ઇવોગ્રેણ કોટરસ્થેન વહ્નિના ॥ ૨૧॥

સંસારદુઃખપાષાણનીરન્ધ્રહૃદયોઽપ્યહમ્ ।
નિજલોકભયાદેવ ગલદ્બાષ્પં ન રોદિમિ ॥ ૨૨॥

શૂન્યા મન્મુખવૃત્તીસ્તાં શુષ્કરોદનનીરસાઃ ।
વિવેક એવ હૃત્સંસ્થો મમૈકાન્તેષુ પશ્યતિ ॥ ૨૩॥

ભૃશં મુહ્યામિ સંસ્મૃત્ય ભાવાભાવમયીં સ્થિતિમ્ ।
દારિદ્ર્યેણેવ સુભગો દૂરે સંસારચેષ્ટયા ॥ ૨૪॥

મોહયન્તિ મનોવૃત્તિં ખણ્ડયન્તિ ગુણાવલિમ્ ।
દુઃખજાલ પ્રયચ્છન્તિ વિપ્રલમ્ભપરાઃ શ્રિયઃ ॥ ૨૫॥

ચિન્તાનિચયચક્રાણિ નાનન્દાય ધનાનિ મે ।
સમ્પ્રસૂતકલત્રાણિ ગૃહાણ્યુગ્રાપદામિવ ॥ ૨૬॥

વિવિધદોષદશાપરિચિન્તનૈ-
ર્વિતતભઙ્ગુરકારણકલ્પિતૈઃ ।
મમ ન નિર્વૃતિમેતિ મનો મુને
નિગડિતસ્ય યથા વનદન્તિનઃ ॥ ૨૭॥

ખલાઃ કાલેકાલે નિશિ નિશિતમોહૈકમિહિકા -
ગતાલોકે લોકે વિષયશતચૌરાઃ સુચતુરાઃ ।
પ્રવૃતાઃ પ્રોદ્યુક્તા દિશિદિશિ વિવેકૈકહરણે
રણે શક્તાસ્તેષાં ક ઇવ વિદુષઃ પ્રોજ્ઝ્યસુભટાઃ ॥ ૨૮॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે પ્રથમપરિતાપો નામ દ્વાદશઃ સર્ગઃ ॥ ૧૨॥

---

## ત્રયોદશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।
ઇયમસ્મિન્સ્થિતોદારા સંસારે પરિકલ્પિતા ।
શ્રીર્મુને પરિમોહાય સાપિ નૂનં કદર્થદા ॥ ૧॥

ઉલ્લાસબહુલાનન્તકલ્લોલાનલમાકુલાન્ ।
જડાન્પ્રવહતિ સ્ફારાન્પ્રાવૃષીવ તરઙ્ગિણી ॥ ૨॥

ચિન્તાદુહિતરો બહ્વ્યો ભૂરિદુર્લલિતૈધિતાઃ ।
ચઞ્ચલાઃ પ્રભવન્ત્યસ્યાસ્તરઙ્ગાઃ સરિતો યથા ॥ ૩॥

એષા હિ પદમેકત્ર ન નિબધ્નાતિ દુર્ભગા ।
દગ્ધેવાનિયતાચારમિતશ્ચેતશ્ચ ધાવતિ ॥ ૪॥

જનયન્તી પરં દાહં પરામૃષ્ટાઙ્ગિકા સતી ।

વિનાશમેવ ધત્તેઽન્તર્દીપલેખેવ કજ્જલમ્ ॥ ૫॥

ગુણાગુણવિચારેણ વિનૈવ કિલ પાર્શ્વગમ્ ।
રાજપ્રકૃતિવન્મૂઢા દુરારૂઢાઽવલમ્બતે ॥ ૬॥

કર્મણા તેનતેનૈષા વિસ્તારમનુગચ્છતિ ।
દોષાશીવિષવેગસ્ય યત્ક્ષીરં વિસ્તરાયતે ॥ ૭॥

તાવચ્છીતમૃદુસ્પર્શાઃ પરે સ્વે ચ જને જનાઃ ।
વાત્યયેવ હિમં યાવચ્છ્રિયા ન પરુષીકૃતાઃ ॥ ૮॥

પ્રાજ્ઞાઃ શૂરાઃ કૃતજ્ઞાશ્ચ પેશલા મૃદવશ્ચ યે ।
પાંસુમુષ્ટ્યેવ મણયઃ શ્રિયા તે મલિનીકૃતાઃ ॥ ૯॥

ન શ્રીઃ સુખાય ભગવન્દુઃખાયૈવ હિ વર્ધતે ।
ગુપ્તા વિમ્=નાશનં ધત્તે મૃતિં વિષલતા યથા ॥ ૧૦॥

શ્રીમાનજનનિન્દ્યશ્ચ શૂરશ્ચાપ્યવિકત્થનઃ ।
સમદૃષ્ટિઃ પ્રભુશ્ચૈવ દુર્લભાઃ પુરુષાસ્ત્રયઃ ॥ ૧૧॥

એષા હિ વિષમા દુઃખભોગિનાં ગહના ગુહા ।
ઘનમોહગજેન્દ્રાણાં વિન્ધ્યશૈલમહાતટી ॥ ૧૨॥

સત્કાર્યપદ્મરજની દુઃખકૈરવચન્દ્રિકા ।
સુદૃષ્ટિદીપિકાવાત્યા કલ્લોલૌઘતરઙ્ગિણી ॥ ૧૩॥

સમ્ભ્રમાભ્રાદિપદવી વિષાદવિષવર્ધિની ।
કેદારિકા વિકલ્પાનાં ખેદાયભયભોગિની ॥ ૧૪॥

હિમં વૈરાગ્યવલ્લીનાં વિકારોલૂકયામિની ।
રાહુદંષ્ટ્રા વિવેકેન્દોઃ સૌજન્યામ્ભોજચન્દ્રિકા ॥ ૧૫॥

ઇન્દ્રાયુધવદાલોલનાનારાગમનોહરા ।
લોલા તડિદિવોત્પન્નધ્વંસિની ચ જડાશ્રયા ॥ ૧૬॥

ચાપલાવજિતારણ્યનકુલી નકુલીનજા ।
વિપ્રલમ્ભનતાત્પર્યજિતોગ્રમૃગતૃષ્ણિકા ॥ ૧૭॥

લહરીવૈકરૂપેણ પદં ક્ષણમકુર્વતી ।
ચલા દીપશિખેવાતિદુર્જ્ઞેયગતિગોચરા ॥ ૧૮॥

સિંહીવ વિગ્રહવ્યગ્રકરીન્દ્રકુલપોથિની ।
ખડ્ગધારેવ શિશિરા તીક્ષ્ણતીક્ષ્ણાશયાશ્રયા ॥ ૧૯॥

નાનયાપહૃતાર્થિન્યા દુરાધિપરિલીનયા ।
પશ્યામ્યભવ્યયા લક્ષ્મ્યા કિઞ્ચિદ્દુઃખાદૃતે સુખમ્ ॥ ૨૦॥

દૂરેણોત્સારિતાઽલક્ષ્મ્યા પુનરેવ તમાદરાત્ ।
અહો બતાશ્લિષ્યતીવ નિર્લજ્જ દુર્જના સદા ॥ ૨૧॥

મનોરમા કર્ષતિ ચિત્તવૃત્તિં
કદર્થસાધ્યા ક્ષણભઙ્ગુરા ચ ।
વ્યાલાવલીગાત્રવિવૃત્તદેહા
શ્વભ્રોત્થિતા પુષ્પલતેવ લક્ષ્મીઃ ॥ ૨૨॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે લક્ષ્મીનિરાકરણં નામ ત્રયોદશઃ સર્ગઃ ॥ ૧૩॥

---

## ચતુર્દશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।

આયુઃ પલ્લવકોણાગ્રલમ્બામ્બુકણભઙ્ગુરમ્ ।
ઉન્મત્તમિવ સન્ત્યજ્ય યાત્યકાણ્ડે શરીરકમ્ ॥ ૧॥

વિષયાશીવિષાસઙ્ગપરિજર્જરચેતસામ્ ।
અપ્રૌઢાત્મવિવેકાનામાયુરાયાસકારણમ્ ॥ ૨॥

યે તુ વિજ્ઞાતવિજ્ઞેયા વિશ્રાન્તા વિતતે પદે ।
ભાવાભાવસમાશ્વાસમાયુસ્તેષાં સુખાયતે ॥ ૩॥

વયં પરિમિતાકારપરિનિષ્ઠિતનિશ્ચયાઃ ।
સંસારભ્રતડિત્પુઞ્જે મુને નાયુષિ નિર્વૃતાઃ ॥ ૪॥

યુજ્યતે વેષ્ટનં વાયોરાકાશસ્ય ચ ખણ્ડનમ્ ।
ગ્રથનં ચ તરઙ્ગાણામાસ્થા નાયુષિ યુજ્યતે ॥ ૫॥

પેલવં શરદીવાભ્રમસ્નેહ ઇવ દીપકઃ ।
તરઙ્ગક ઇવાલોલં ગતમેવોપલક્ષ્યતે ॥ ૬॥

તરઙ્ગં પ્રતિબિમ્બેન્દું તડિત્પુઞ્જં નભોમ્બુજમ્ ।

ગ્રહીતુમાસ્થાં બધ્નામિ ન ત્વાયુષિ હતસ્થિતૌ ॥ ૭॥

અવિશ્રાન્તમનાઃ શૂન્યમાયુરાતતમીહતે ।
દુઃખાયૈવ વિમૂઢાઽન્તર્ગર્ભમશ્વતરી યથા ॥ ૮॥

સંસારસંસૃતાવસ્યાં ફેનોઽસ્મિન્સર્ગસાગરે ।
કાયવલ્લ્યામ્ભસો બ્રહ્મઞ્જીવિતં મે ન રોચતે ॥ ૯॥

પ્રાપ્યં સમ્પ્રાપ્યતે યેન ભૂયો યેન ન શોચ્યતે ।
પરાયા નિર્વૃતેઃ સ્થાનં યત્તજ્જીવિતમુચ્યતે ॥ ૧૦॥

તરવોઽપિ હિ જીવન્તિ જીવન્તિ મૃગપક્ષિણઃ ।
સ જીવતિ મનો યસ્ય મનનેન ન જીવતિ ॥ ૧૧॥

જાતાસ્ત એવ જગતિ જન્તવઃ સાધુજીવિતાઃ ।
યે પુનર્નેહ જાયન્તે શેષા જરઠગર્દભાઃ ॥ ૧૨॥

ભારોઽવિવેકિનઃ શાસ્ત્રં ભારો જ્ઞાનં ચ રાગિણઃ ।
અશાન્તસ્ય મનો ભારો ભારોઽનાત્મવિદો વપુઃ ॥ ૧૩॥

રૂપમાયુર્મનો બુદ્ધિરહઙ્કારસ્તથેહિતમ્ ।
ભારો ભારધરસ્યેવ સર્વં દુઃખાય દુર્ધિયઃ ॥ ૧૪॥

અવિશ્રાન્તમનાપુર્ણમાપદાં પરમાસ્પદમ્ ।
નીડં રોગવિહઙ્ગાનામાયુરાયાસનં દૃઢમ્ ॥ ૧૫॥

પ્રત્યહં ખેદમુત્સૃજ્ય શનૈરલમનારતમ્ ।
આખ્રુનેવ જરચ્છ્વભ્રં કાલેન વિનિહન્યતે ॥ ૧૬॥

શરીરબિલવિશ્રાન્તૈર્વિષદાહપ્રદાયિભિઃ ।
રોગૈરાપીયતે રૌદ્રૈર્વ્યાલૈરિવ વનાનિલઃ ॥ ૧૭॥

પ્રસ્નુવાનૈરવિચ્છેદં તુચ્છૈરન્તરવાશિભિઃ ।
દુઃખૈરાવૃશ્ચ્યતે ક્રૂરૈર્ઘુણૈરિવ જરદ્દ્રુમઃ ॥ ૧૮॥

નૂનં નિગરણાયાશુ ઘનગર્ધમનારતમ્ ।
આખ્રુર્માર્જારકેણેવ મરણેનાવલોક્યતે ॥ ૧૯॥

ગન્ધાદિગુણગર્ભિણ્યા શૂન્યયાઽશક્તિવેશ્યયા ।
અન્નં મહાશનેનેવ જરયા પરિજીર્યતે ॥ ૨૦॥

દિનૈઃ કતિપયૈરેવ પરિજ્ઞાય ગતાદરમ્ ।
દુર્જનઃ સુજનેનેવ યૌવનેનાવમુચ્યતે ॥ ૨૧॥

વિનાશસુહૃદા નિત્યં જરામરણબન્ધુના ।
રૂપં ખિઙ્ગવરેણેવ કૃતાન્તેનાભિલષ્યતે ॥ ૨૨॥

સ્થિરતયા સુખભાસિતયા તયા
સતતમુજ્ઝિતમુત્તમફલ્ગુ ચ ।
જગતિ નાસ્તિ તથા ગુણવર્જિતં
મરણભાજનમાયુરિદં યથા ॥ ૨૩॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે જીવિતગર્હા નામ ચતુર્દશઃ સર્ગઃ ॥ ૧૪॥

---

પઞ્ચદશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।

મુધૈવાભ્યુત્થિતો મોહાન્મુધૈવ પરિવર્ધતે ।
મિથ્યામયેન ભીતોઽસ્મિ દુરહઙ્કારશત્રુણા ॥ ૧॥

અહઙ્કારવશાદેવ દોષકોશકદર્થતામ્ ।
દદાતિ દીનદીનાનાં સંસારો વિવિધાકૃતિઃ ॥ ૨॥

અહઙ્કારવશાદાપદહઙ્કારાદ્દુરાધયઃ ।
અહઙ્કારવશાદીહા ત્વહઙ્કારો મમામયઃ ॥ ૩॥

તમહઙ્કારમાશ્રિત્ય પરમં ચિરવૈરિણમ્ ।
ન ભુજે ન પિબામ્યમ્ભઃ કિમુ ભોગાન્ભુજે મુને ॥ ૪॥

સંસારરજની દીર્ઘા માયા મનસિ મોહિની ।
તતોઽહઙ્કારદોષેણ કિરાતેનેવ વાગુરા ॥ ૫॥

યાનિ દુઃખાનિ દીર્ઘાણિ વિષમાણિ મહાન્તિ ચ ।
અહઙ્કારાત્પ્રસૂતાનિ તાન્યગાત્ખદિરા ઇવ ॥ ૬॥

શમેન્દુસૈંહિકેયાસ્યં ગુણપદ્મહિમાશનિમ્ ।
સામ્યમેઘશરત્કાલમહઙ્કારં ત્યજામ્યહમ્ ॥ ૭॥

નાહં રામો ન મે વાઞ્છા ભાવેષુ ન ચ મે મનઃ ।

શાન્ત આસિતુમિચ્છામિ સ્વાત્મનીવ જિનો યથા ॥ ૮॥

અહઙ્કારવશાદ્યદ્યન્મયા ભુક્તં હુતં કૃતમ્ ।
સર્વં તત્તદવસ્ત્વેવ વસ્ત્વહઙ્કારરિક્તતા ॥ ૯॥

અહમિત્યસ્તિ દેદ્બ્રહ્મન્નહમાપદિ દુઃખિતઃ ।
નાસ્તિ દેત્સુખિતસ્તસ્માદનહઙ્કારિતા વરમ્ ॥ ૧૦॥

અહઙ્કારપરિત્યજ્ય મુને શાન્તમનસ્તયા ।
અવતિષ્ઠે ગતોદ્વેગો ભોગૌઘો ભઙ્ગુરાસ્પદઃ ॥ ૧૧॥

બ્રહ્મન્યાવદહઙ્કારવારિદઃ પરિજૃમ્ભતે ।
તાવદ્વિકાસમાયાતિ તૃષ્ણાકુટજમઞ્જરી ॥ ૧૨॥

અહઙ્કારઘને શાન્તે તૃષ્ણા નવતડિલ્લતા ।
શાન્તદીપશિખાવૃત્ત્યા ક્વાપિ યાત્યતિસત્વરમ્ ॥ ૧૩॥

અહઙ્કારમહાવિન્ધ્યે મનોમત્તમહાગજઃ ।
વિસ્ફૂર્જતિ ઘનાસ્ફોટૈઃ સ્તનિતૈરિવ વારિદઃ ॥ ૧૪॥

ઇહ દેહમહારણ્યે ઘનાહઙ્કારકેસરી ।
યોઽયમુલ્લસતિ સ્ફારસ્તેનેદં જગદાતતમ્ ॥ ૧૫॥

તૃષ્ણાતન્તુલવપ્રોતા બહુજન્મપરમ્પરા ।
અહઙ્કારોગ્રખિઙ્ગેન કણ્ઠે મુક્તાવલી કૃતા ॥ ૧૬॥

પુત્રમિત્રકલત્રાદિતન્ત્રમન્ત્રવિવર્જિતમ્ ।
પ્રસારિતમનેનેહ મુનેઽહઙ્કારવૈરિણા ॥ ૧૭॥

પ્રમાર્જિતેઽહમિત્યસ્મિન્પદે સ્વયમપિ દ્રુતમ્ ।
પ્રમાર્જિતા ભવન્ત્યેતે સર્વ એવ દુરાધયઃ ॥ ૧૮॥

અહમિત્યમ્બુદે શાન્તે શનૈશ્ચ શમશાતિની ।
મનોગગનસંમોહમિહિકા ક્વાપિ ગચ્છતિ ॥ ૧૯॥

નિરહઙ્કારવૃત્તેર્મે મૌર્ખ્યાચ્છોકેન સીદતઃ ।
યત્કિઞ્ચિદુચિતં બ્રહ્મંસ્તદાખ્યાતુમિહાર્હસિ ॥ ૨૦॥

સર્વાપદાં નિલયમધ્રુવમન્તરસ્થ-
મુન્મુક્તમુત્તમગુણેન ન સંશ્રયામિ ।
યત્નાદહ્કૃતિપદં પરિતોઽતિદુઃખં

શેષેણ માં સમનુશાધિ મહાનુભાવ ॥ ૨૧॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે અહઙ્કારજુગુપ્સા નામ પઞ્ચદશઃ સર્ગઃ ॥ ૧૫॥

---

ષોડશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।

દોષૈર્જર્જરતાં યાતિ સત્કાર્યાદાર્યસેવનાત્ ।
વાતાન્તઃપિચ્છલવવચ્ચેતશ્ચલતિ ચઞ્ચલમ્ ॥ ૧॥

ઇતશ્ચેતશ્ચ સુવ્યગ્રં વ્યર્થમેવાભિધાવતિ
દૂરાદ્દૂરતરં દીનં ગ્રામે કૌલેયકો યથા ॥ ૨॥

ન પ્રાપ્નોતિ ક્વચિત્કિઞ્ચિત્પ્રાપ્તૈરપિ મહાધનૈઃ ।
નાન્તઃ સમ્પૂર્ણતામેતિ કરણ્ડક ઇવામ્બુભિઃ ॥ ૩॥

નિત્યમેવ મુને શૂન્યં કદાશાવાગુરાવૃતમ્ ।
ન મનો નિર્વૃતિં યાતિ મૃગો યૂથાદિવ ચ્યુતઃ ॥ ૪॥

તરઙ્ગતરલાં વૃત્તિં દધદાલૂનશીર્ણતામ્ ।
પરિત્યજ્ય ક્ષણામપિ હૃદયે યાતિ ન સ્થિતિમ્ ॥ ૫॥

મનો શ્ચનનવિક્ષુબ્ધં દિશો દશ વિધાવતિ ।
મન્દરાહનનોદ્ધૂતં ક્ષીરાર્ણવપયો યથા ॥ ૬॥

કલ્લોલકલિતાવર્તં માયામકરમાલિતમ્ ।
ન નિરોદ્ધું સમર્થોઽસ્મિ મનોમયમહાર્ણવમ્ ॥ ૭॥

ભોગદૂર્વાઙ્કુરાકાઙ્ક્ષી શ્વભ્રપાતમચિન્તયન્ ।
મનોહરિણકો બ્રહ્મન્દૂરં વિપરિધાવતિ ॥ ૮॥

ન કદાચન મે ચેતઃ સ્વામાલૂનવિશિર્ણતામ્ ।
ત્યજત્યાકુલયા વૃત્ત્યા ચઞ્ચલત્વમિવાર્ણવઃ ॥ ૯॥

ચેતશ્ચઞ્ચલયા વૃત્ત્યા ચિન્તાનિચયચઞ્ચુરમ્ ।
ધૃતિં બધ્નાતિ નૈકત્ર પઞ્જરે કેસરી યથા ॥ ૧૦॥

મનો મોહરથારૂઢં શરીરાત્સમતાસુખમ્ ।

હરત્યપહતોદ્વેગં હંસઃ ક્ષીરમિવામ્ભસઃ ॥ ૧૧॥

અનલ્પકલ્પનાતલ્પે વિલીનાશ્ચિત્તવૃત્તયઃ ।
મુનીન્દ્ર ન પ્રબુધ્યન્તે તેન તપ્યેઽહમાકુલઃ ॥ ૧૨॥

ક્રોડીકૃતદૃઢગ્રન્થિતૃષ્ણાસૂત્રે સ્થિતાત્મના ।
વિહગો જાલકેનેવ બ્રહ્મન્બદ્ધોઽસ્મિ ચેતસા ॥ ૧૩॥

સન્તતામર્ષધૂમેન ચિન્તાજ્વાલાકુલેન ચ ।
વહ્નિનેવ તૃણં શુષ્કં મુને દગ્ધોઽસ્મિ ચેતસા ॥ ૧૪॥

ક્રૂરેણ જડતાં યાતસ્તૃષ્ણાભાર્યાનુગામિના ।
શવં કૌલેયકેનેવ બ્રહ્મન્ભુક્તોઽસ્મિ ચેતસા ॥ ૧૫॥

તરઙ્ગતરલાસ્ફાલવૃત્તિના જડરૂપિણા ।
તટવૃક્ષ ઇવૌઘેન બ્રહ્મન્નીતોઽસ્મિ ચેતસા ॥ ૧૬॥

અવાન્તરનિપાતાય શૂન્યે વા ભ્રમણાય ચ ।
તૃણં દણ્ડનિલેનેવ દૂરે નીતોઽસ્મિ ચેતસા ॥ ૧૭॥

સંસારજલધેરસ્માન્નિત્યમુત્તરણોન્મુખઃ ।
સેતુનેવ પયઃપૂરો રોધિતોઽસ્મિ કુચેતસા ॥ ૧૮॥

પાતાલાદ્ગચ્છતાં પૃથ્વીં પૃથ્વ્યાઃ પાતાલગામિના ।
કૂપકાષ્ઠં કુદામ્નેવ વેષ્ટિતોઽસ્મિ કુચેતસા ॥ ૯॥

મિથ્યૈવ સ્ફારરૂપેણ વિચારાદ્વિશરારુણા ।
બાલો વેતાલકેનેવ ગૃહીતોઽસ્મિ કુચેતસા ॥ ૨૦॥

વહ્નેરુષ્ણતરઃ શૈલાદપિ કષ્ટતરક્રમઃ ।
વજ્રાદપિ દૃઢો બ્રહ્મન્દુર્નિગ્રહમનોગ્રહઃ ॥ ૨૧॥

ચેતઃ પતતિ કાર્યેષુ વિહગઃ સ્વામિષેષ્વિવ ।
ક્ષણેન વિરતિં યાતિ બાલઃ ક્રીડનકાદિવ ॥ ૨૨॥

જડપ્રકૃતિરાલોલો વિતતાવર્તવૃત્તિમાન્ ।
મનોઽબ્ધિરહિતવ્યાલો દૂરં નયતિ તાત મામ્ ॥ ૨૩॥

અપ્યબ્ધિપાનાન્મહતઃ સુમેરૂન્મૂલનાદપિ ।
અપિ વહ્ન્યશનાત્સાધો વિષમશ્ચિત્તનિગ્રહઃ ॥ ૨૪॥

ચિત્તં મારણમર્થાનાં તસ્મિન્સતિ જગત્ત્રયમ્ ।
તસ્મિન્ક્ષીણે જગત્ક્ષીણં તચ્ચિકિત્સ્યં પ્રયત્નતઃ ॥ ૨૫॥

ચિતાદિમાનિ સુખદુઃખશતાનિ નૂન-
મભ્યાગતાન્યગવરાદિવ કાનનાનિ ।
તસ્મિન્વિવેકવશસ્તનુતાં પ્રયાતે
મન્યે મુને નિપુણમેવ ગલન્તિ તાનિ ॥ ૨૬॥

સકલગુણજયાશા યત્ર બદ્ધા મહદ્ભિ-
સ્તમરિમિહ વિજેતું ચિત્તમભ્યુત્થિતોઽહમ્ ।
વિગતરતિતયાન્તર્નાભિનન્દામિ લક્ષ્મીં
જડમલિનવિલાસાં મેઘલેખામિવેન્દુઃ ॥ ૨૭॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે વૈરાગ્યચિત્તદૌરાત્મ્યં નામ ષોડશઃ સર્ગઃ ॥ ૧૬॥

---

## સપ્તદશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।

હાર્દાન્ધકારશર્વર્યા તૃષ્ણયેહ દુરન્ત્યયા ।
સ્ફુરન્તિ ચેતનાકાશે દોષકૌશિકપઙ્ક્તયઃ ॥ ૧॥

અન્તર્દાહપ્રદાયિન્યા સમૂઢરસમાર્દવઃ ।
પઙ્કુ આદિત્યદીપ્ત્યેવ શોષં નીતોઽસ્મિ ચિન્તયા ॥ ૨॥

મમ ચિત્તમહારણ્યે વ્યામોહતિમિરાકુલે ।
શૂન્યે તાણ્ડવિની જાતા ભૃશમાશાપિશાચિકા ॥ ૩॥

વચોરચિતનીહારા કઞ્ચનોપવનોજ્જ્વલા ।
નૂનં વિકાસમાયાતિ ચિન્તાકણકમઞ્જરી ॥ ૪॥

અલમન્તર્ભ્રમાયૈવ તૃષ્ણાતરલિતાશયા ।
આયાતા વિષમોલ્લાસમૂર્મિરમ્બુનિધાવિવ ॥ ૫॥

ઉદ્દામકલ્લોલરવા દેહાદ્રૌ વહતીહ મે ।
તરઙ્ગતરલાકારા તરતૃષ્ણાતરઙ્ગિણી ॥ ૬॥

વેગં સંરોદ્ધુમુદિતો વાત્યયેવ જરત્તૃણમ્ ।

નીતઃ કલુષયા ક્વાપિ તૃષ્ણયા ચિત્તચાતકઃ ॥ ૭॥

યાં યામહમતીવાસ્થાં સંશ્રયામિ ગુણશ્રિયામ્ ।
તાં તાં કૃન્તતિ મે તૃષ્ણા તન્ત્રીમિવ કુમૂષિકા ॥ ૮॥

પયસીવ જરત્પર્ણં વાયાવિવ જરત્તૃણં।
નભસીવ શરન્મેઘશ્ચિન્તાચક્રે ભ્રમામ્યહમ્ ॥ ૯॥

ગન્તુમાસ્પદમાત્મીયમસમર્થધિયો વયમ્ ।
ચિન્તાજાલે વિમુહ્યામો જાલે શકુનયો યથા ॥ ૧૦॥

તૃષ્ણાભિધાનયા તાત દગ્ધોઽસ્મિ જ્વાલયા તથા ।
યથા દાહોપશમનમાશઙ્કે નામૃતૈરપિ ॥ ૧૧॥

દૂરં દૂરમિતો ગત્વા સમેત્ય ચ પુનઃ પુનઃ ।
ભ્રમત્યાશુ દિગન્તેષુ તૃષ્ણોન્મત્ત તુરઙ્ગમી ॥ ૧૨॥

જડસંસર્ગિણી તૃષ્ણા કૃતોર્ધ્વાધોગમાગમા ।
ક્ષુબ્ધા ગ્રન્થિમતી નિત્યમારઘટ્ટાગ્રરજ્જુવત્ ॥ ૧૩॥

અન્તર્ગ્રથિતયા દેહે સર્વદુશ્છેદયાઽનયા ।
રજ્જ્વેવાશુ બલીવર્દસ્તૃષ્ણયા વાહ્યતે જનઃ ॥ ૧૪॥

પુત્રમિત્રકલત્રાદિતૃષ્ણયા નિત્યકૃષ્ટયા ।
ખગેષ્વિવ કિરાત્યેદં જાલં લોકેષુ રચ્યતે ॥ ૧૫॥

ભીષયત્યપિ ધીરં મામન્ધયત્યપિ સેક્ષણમ્ ।
ખેદયત્યપિ સાનન્દં તૃષ્ણા કૃષ્ણેવ શર્વરી ॥ ૧૬॥

કુટિલા કોમલસ્પર્શા વિષવૈષમ્યશંસિની ।
દશત્યપિ મનાક્સ્પૃષ્ટા તૃષ્ણા કૃષ્ણેવ ભોગિની ॥ ૧૭॥

ભિન્દતી હૃદયં પુંસાં માયામયવિધાયિની ।
દૌર્ભાગ્યદાયિની દીના તૃષ્ણા કૃષ્ણેવ રાક્ષસી ॥ ૧૮॥

તન્દ્રીતન્ત્રીગણૈઃ કોશં દધાના પરિવેષ્ટિતમ્ ।
નાનન્દે રાજતે બ્રહ્મંસ્તૃષ્ણા જર્જરવલ્લકી ॥ ૧૯॥

નિત્યમેવાતિમલિના કટુકોન્માદદાયિની ।
દીર્ઘતન્ત્રી ઘનસ્નેહા તૃષ્ણાગહ્વરવલ્લરી ॥ ૨૦॥

અનાનન્દકરી શૂન્યા નિષ્ફલા વ્યર્થમુન્નતા ।
અમઙ્ગલકરી ક્રૂરા તૃષ્ણા ક્ષીણેવ મઞ્જરી ॥ ૨૧॥

અનાવર્જિતચિત્તાપિ સર્વમેવાનુધાવતિ ।
ન ચાપ્નોતિ ફલં કિઞ્ચિત્તૃષ્ણા જીર્ણેવ કામિની ॥ ૨૨॥

સંસારવૃન્દે મહતિ નાનારસસમાકુલે ।
ભુવનાભોગરઙ્ગેષુ તૃષ્ણા જરઠનર્તકી ॥ ૨૩॥

જરાકુસુમિતારૂઢા પાતોત્પાતફલાવલિઃ ।
સંસારજઙ્ગલે દીર્ઘે તૃષ્ણા વિષલતા તતા ॥ ૨૪॥

યન્ન શક્નોતિ તત્રાપિ ધત્તે તાણ્ડવિતાં ગતિમ્ ।
નૃત્યત્યાનન્દરહિતં તૃષ્ણા જીર્ણેવ નર્તકી ॥ ૨૫॥

ભૃશં સ્ફુરતિ નીહારે શામ્યત્યાલોક આગતે ।
દુર્લઙ્ઘ્યેષુ પદં ધત્તે ચિન્તા ચપલબર્હિણી ॥ ૨૬॥

જડકલ્લોલબહુલા ચિરં શૂન્યાન્તરાન્તરા ।
ક્ષણમુલ્લાસમાયાતિ તૃષ્ણા પ્રાવૃટ્તરઙ્ગિણી ॥ ૨૭॥

નષ્ટમુત્સૃજ્ય તિષ્ઠન્તં તૃષ્ણા વૃક્ષમિવાપરમ્ ।
પુરુષાત્પુરુષં યાતિ તૃષ્ણા લોલેવ પક્ષિણી ॥ ૨૮॥

પદં કરોત્યલઙ્ઘ્યેઽપિ તૃપ્તાપિ ફલમીહતે ।
ચિરં તિષ્ઠતિ નૈકત્ર તૃષ્ણા ચપલમર્કટી ॥

ઇદં કૃત્વેદમાયાતિ સર્વમેવાસમઞ્જસમ્ ।
અનારતં ચ યતતે તૃષ્ણા ચેષ્ટેવ ચૈવિકી ॥ ૩૦॥

ક્ષણમાયાતિ પાતાલં ક્ષણં યાતિ નભસ્થલમ્ ।
ક્ષણં ભ્રમતિ દિક્કુઞ્જે તૃષ્ણા હૃત્પદ્મષટ્પદી ॥ ૩૧॥

સર્વસંસારદોષાણાં તૃષ્ણૈકા દીર્ઘદુઃખદા ।
અન્તઃપુરસ્થમપિ યા યોજયત્યતિસઙ્કટે ॥ ૩૨॥

પ્રયચ્છતિ પરં જાડ્યં પરમાલોકરોધિની ।
મોહનીહારગહના તૃષ્ણા જલદમાલિકા ॥ ૩૩॥

સર્વેષાં જન્તુજાતાનાં સંસારવ્યવહારિણામ્ ।
પરિપ્રોતમનોમાલા તૃષ્ણા બન્ધનરજ્જુવત્ ॥ ૩૪॥

વિચિત્રવર્ણા વિગુણા દીર્ઘા મલિનસઙ્કસ્થિતિઃ ।
શૂન્યા શૂન્યપદા તૃષ્ણા શક્રકાર્મુકધર્મિણી ॥ ૩૫॥

અશનિર્ગુણસસ્યાનાં ફલિતા શરદાપદામ્ ।
હિમં સંવિત્સરોજાનાં તમસાં દીર્ઘયામિની ॥ ૩૬॥

સંસારનાટકનટી કાર્યાલયવિહઙ્ગમી ।
માનસારણ્યહરિણી સ્મરસઙ્ગીતવલ્લકી ॥ ૩૭॥

વ્યવહારાબ્ધિલહરી મોહમાતઙ્ગશૃઙ્ખલા ।
સર્ગન્યગ્રોધસુલભા દુઃખકૈરવચન્દ્રિકા ॥ ૩૮॥

જરામરણદુઃખાનામેકા રત્નસમુદ્રિકા ।
આધિવ્યાધિવિલાસાનાં નિત્યં મત્તા વિલાસિની ॥ ૩૯॥

ક્ષણમાલોકવિમલા સાન્ધકારલવા ક્ષણમ્ ।
વ્યોમવીથ્યુપમા તૃષ્ણા નીહારગહના ક્ષણમ્ ॥ ૪૦॥

ગચ્છત્યુપશમં તૃષ્ણા કાયવ્યાયામશાન્તયે ।
તમી ઘનતમઃકૃષ્ણા યથા રક્ષોનિવૃત્તયે ॥ ૪૧॥

તાવન્મુહ્યત્યયં મૂકો લોકો વિલુલિતાશયઃ ।
યાવદેવાનુસન્ધત્તે તૃષ્ણા  વિષવિષૂચિકા ॥ ૪૨॥

લોકોઽયમખિલં દુઃખં ચિન્તયોજ્ઝિતયોજ્ઝતિ ।
તૃષ્ણાવિષૂચિકામન્ત્રચિન્તાત્યાગો હિ કથ્યતે ॥ ૪૩॥

તૃણપાષાણકાષ્ઠાદિસર્વમામિષશઙ્કયા ।
આદદાના સ્ફુરત્યન્તે તૃષ્ણા મત્સ્યી હ્રદે યથા ॥ ૪૪॥

રોગાર્તિરઙ્ગનાતૃષ્ણા ગમ્ભીરમપિ માનવમ્ ।
ઉત્તાનતાં નયન્ત્યાશુ સૂર્યાંશવ ઇવામ્બુજમ્ ॥ ૪૫॥

અન્તઃશૂન્યા ગ્રન્થિમત્યો દીર્ઘસ્વાઙ્કુરકણ્ટકાઃ ।
મુક્તામણિપ્રિયા નિત્યં તૃષ્ણા વેણુલતા ઇવ ॥ ૪૬॥

અહો બત મહચ્ચિત્રં તૃષ્ણામપિ મહાધિયઃ ।
દુશ્છેદામપિ કૃન્તન્તિ વિવેકેનામલાસિના ॥ ૪૭॥

નાસિધારા ન વજ્રાર્ચિર્ન તપ્તાયઃકણાર્ચિષઃ ।

તથા તીક્ષ્ણા યથા બ્રહ્મંસ્તૃષ્ણેયં હૃદિ સંસ્થિતા ॥ ૪૮॥

ઉજ્જ્વલાઽસિતતીક્ષ્ણાગ્રા સ્નેહદીર્ઘદશા પરા ।
પ્રકાશા દાહદુઃસ્પર્શા તૃષ્ણા દીપશિખા ઇવ ॥ ૪૯॥

અપિ મેરુસમં પ્રાજ્ઞમપિ શૂરમપિ સ્થિરમ્ ।
તૃણીકરોતિ તૃષ્ણૈકા નિમેષેણ નરોત્તમમ્ ॥ ૫૦॥

સંસ્તીર્ણગહના ભીમા ઘનજાલરજોમયી ।
સાન્ધકારોગ્રનીહારા તૃષ્ણા વિન્ધ્યમહાતટી ॥ ૫૧॥

એકૈક સર્વભુવનાન્તરલબ્ધલક્ષ્યા
દુર્લક્ષ્યતામુપગતૈવ વપુઃસ્થિતૈવ ।
તૃષ્ણા સ્થિતા જગતિ ચઞ્ચલવીચિમલે
ક્ષીરોદકામ્બુતરલે મધુરેવ શક્તિઃ ॥ ૫૨॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે તૃષ્ણાભઙ્ગો નામ સપ્તદશઃ સર્ગઃ ॥ ૧૭॥

---

અષ્ટાદશઃ સર્ગઃ

શ્રીરામ ઉવાચ ।

આર્દ્રાન્ત્રતન્ત્રીગહનો વિકારી પરિપાતવાન્ ।
દેહઃ સ્ફુરતિ સંસારે સોઽપિ દુઃખાય કેવલમ્ ॥ ૧॥

અજ્ઞોઽપિ તજ્જ્ઞસદૃશો વલિતાત્મચમત્કૃતિઃ ।
યુક્ત્યા ભવ્યોઽપ્યભવ્યોઽપિ ન જડો નાપિ ચેતનઃ ॥ ૨॥

જડાજડદૃશોર્મધ્યે દોલાયિતદુરાશયઃ ।
અવિવેકી વિમૂઢાત્મા મોહમેવ પ્રયચ્છતિ ॥ ૩॥

સ્તોકેનાનન્દમાયાતિ સ્તોકેનાયાતિ ખેદિતામ્ ।
નાસ્તિ દેહસમઃ શોચ્યો નીચો ગુણબહિષ્કૃતઃ ॥ ૪॥

આગમાપાયિના નિત્યં દન્તકેસરશાલિના ।
વિકાસસ્મિતપુષ્પેણ પ્રતિક્ષણમલઙ્કૃતઃ ॥ ૫॥

ભુજશાખો ઘનસ્કન્ધો દ્વિજસ્તમ્ભશુભસ્થિતિઃ ।
લોચનાલિબિલાક્રાન્તઃ શિરઃપીઠબૃહત્ફલઃ ॥ ૬॥

શ્રવદન્તરસગ્રસ્તો હસ્તપાદસુપલ્લવઃ ।
ગુલ્મવાન્કાર્યસઙ્ઘાતો વિહઙ્ગમકૃતાસ્પદઃ ॥ ૭॥

સચ્છાયો દેહવૃક્ષોઽયં જીવપાન્થગણાસ્પદઃ ।
કસ્યાત્મીયઃ કસ્ય પર આસ્થાનાસ્થે કિલાત્ર કે ॥ ૮॥

તાત સન્તરણાર્થેન ગૃહીતાયાં પુનઃ પુનઃ ।
નાવિ દેહલતાયાં ચ કસ્ય સ્યાદાત્મભાવના ॥ ૯॥

દેહનામ્નિ વને શૂન્યે બહુગર્તસમાકુલે ।
તનૂરુહાસઙ્ખ્યતરૌ વિશ્વાસં કોઽધિગચ્છતિ ॥ ૧૦॥

માંસસ્નાય્વસ્થિવલિતે શરીરપટહેઽદૃઢે ।
માર્જારવદહં તાત તિષ્ઠામ્યત્ર ગતધ્વનૌ ॥ ૧૧॥

સંસારારણ્યસંરૂઢો વિલસચ્ચિત્તમર્કટઃ ।
ચિન્તામઞ્જરિતાકારો દીર્ઘદુઃખઘુણક્ષતઃ ॥ ૧૨॥

તૃષ્ણાભુજઙ્ગમીગેહં કોપકાકકૃતાલયઃ ।
સ્મિતપુણ્યોદ્ગમઃ શ્રીમાઞ્છુભાશુભમહાફલઃ ॥ ૧૩॥

સુસ્કન્ધૌઘલતાજાલો હસ્તસ્તબકસુન્દરઃ ।
પવનસ્પન્દિતાશેષસ્વાઙ્ગાવયવપલ્લવઃ ॥ ૧૪॥

સર્વેન્દ્રિયખગાધારઃ સુજાનુસ્તમ્ભ ઉન્નતઃ ।
સરસચ્છાયયા યુક્તઃ કામપાન્થનિષેવિતઃ ॥ ૧૫॥

મૂર્ધસઞ્જનિતાઽઽદીર્ઘશિરોરુહતૃણાવલિઃ ।
અહઙ્કારગૃધ્રકૃતકુલાયઃ સુષિરોદરઃ ॥ ૧૬॥

વિચ્છિન્નવાસનાજાલમૂલત્વાદ્દુર્લવાકૃતિઃ ।
વ્યાયામવિરસઃ કાયપ્લક્ષોઽયં ન સુખાય મે ॥ ૧૭॥

કલેવરમહઙ્કારગૃહસ્થસ્ય મહાગૃહમ્ ।
લુઠત્વભ્યેતુ વા સ્થૈર્યં કિમનેન મુને મમ ॥ ૧૮॥

પઙ્ક્તિબદ્ધેન્દ્રિયપશું વલત્તૃષ્ણાગૃહાઙ્ગનમ્ ।
રાગરઞ્જિતસર્વાઙ્ગં નેષ્ટં દેહગૃહં મમ ॥ ૧૯॥

પૃષ્ઠાસ્થિકાષ્ઠસઙ્ઘટ્ટપરિસઙ્કુટકોટરમ્ ।

આન્ત્રરજ્જુભિરાબદ્ધં નેષ્ટં દેહગૃહં મમ ॥ ૨૦॥

પ્રસૃતસ્નાયુતન્ત્રીકં રક્તામ્બુકૃતકર્દમમ્ ।
જરામઙ્ક્ષોલધવલં નેષ્ટં દેહગૃહં મમ ॥ ૨૧॥

ચિત્તભૃત્યકૃતાનન્તચેષ્ટાવષ્ટબ્ધસંસ્થિતિ ।
મિથ્યામોહમહાસ્થૂણં નેષ્ટં દેહગૃહં મમ ॥ ૨૨॥

દુઃખાર્ભકકૃતાક્રન્દં સુખશય્યામનોરમમ્ ।
દુરીહાદગ્ધદાસીકં નેષ્ટં દેહગૃહં મમ ॥ ૨૩॥

મલાઢ્યવિષયવ્યૂહભાણ્ડોપસ્કરસઙ્કટમ્ ।
અજ્ઞાનક્ષારવલિતં નેષ્ટં દેહગૃહં મમ ॥ ૨૪॥

ગુલ્ફગુગ્ગુલુવિશ્રાન્તજાનૂર્ધ્વસ્તમ્ભમસ્તકમ્ ।
દીર્ઘદોર્દારુસુદૃઢં નેષ્ટં દેહગૃહં મમ ॥ ૨૫॥

પ્રકટાક્ષગવાક્ષાન્તઃ ક્રીડત્પ્રજ્ઞાગૃહાઙ્ગનમ્ ।
ચિન્તાદુહિતૃકં બ્રહ્મન્નેષ્ટં દેહગૃહં મમ ॥ ૨૬॥

મૂર્ધજાચ્છાદનચ્છન્નકર્ણશ્રીચન્દ્રશાલિકમ્ ।
આદીર્ઘાઙ્ગુલિનિર્વ્યૂહં નેષ્ટં દેહગૃહં મમ ॥ ૨૭॥

સર્વાઙ્ગકુડ્યસઙ્ઘાતઘનરોમયવાઙ્કુરમ્ ।
સંશૂન્યપેટવિવરં નેષ્ટં દેહગૃહં મમ ॥ ૨૮॥

નખોર્ણનાભિનિલયં સરમારણિતાન્તરમ્ ।
ભાઙ્કારકારિપવનં નેષ્ટં દેહગૃહં મમ ॥ ૨૯॥

પ્રવેશનિર્ગમવ્યગ્રવાતવેગમનારતમ્ ।
વિતતાક્ષગવાક્ષં તન્નેષ્ટં દેહગૃહં મમ ॥ ૩૦॥

જિહ્વામર્કટિકાક્રાન્તવદનદ્વારભીષણમ્ ।
દૃષ્ટદન્તાસ્થિશકલં નેષ્ટં દેહગૃહં મમ ॥ ૩૧॥

ત્વક્સુધાલેપમસૃણં યન્ત્રસઞ્ચારચઞ્ચલમ્ ।
મનઃ સદાખુનોત્ખાતં નેષ્ટં દેહગૃહં મમ ॥ ૩૨॥

સ્મિતદીપપ્રભોદ્ભાસિ ક્ષણમાનન્દસુન્દરમ્ ।
ક્ષણં વ્યાપ્તં તમઃપૂરૈર્નેષ્ટં દેહગૃહં મમ ॥ ૩૩॥

સમસ્તરોગાયતનં વલીપલિતપત્તનમ્ ।
સર્વાધિસારગહનં નેષ્ઠં દેહગૃહં મમ ॥ ૩૪॥

અક્ષર્ક્ષક્ષોભવિષમા શૂન્યા નિઃસારકોટરા ।
તમોગહનદિક્કુઞ્જા નેષ્ટા દેહાટવી મમ ॥ ૩૫॥

દેહાલયં ધારયિતું ન શક્નોમિ મુનીશ્વરઃ ।
પઙ્કમગ્નં સમુદ્ધર્તું ગજમલ્પબલો યથા ॥ ૩૬॥

કિં શ્રિયા કિં ચ રાજ્યેન કિં કાયેન કિમીહિતૈઃ ।
દિનૈઃ કપિતયૈરેવ કાલઃ સર્વં નિકૃન્તતિ ॥ ૩૭॥

રક્તમાંસમયસ્યાસ્ય સબાહ્યાભ્યન્તરં મુને ।
નાશૈકધર્મિણો બ્રૂહિ કૈવ કાયસ્ય રમ્યતા ॥ ૩૮॥

મરણાવસરે કાયા જીવં નાનુસરન્તિ યે ।
તેષુ તાત કૃતઘ્નેષુ કૈવાસ્થા વદ ધીમતામ્ ॥ ૩૯॥

મત્તેભકર્ણાગ્રચલઃ કાયો લમ્બામ્બુભઙ્ગુરઃ ।
ન સન્ત્યજતિ માં યાવત્તાવદેનં ત્યજામ્યહમ્ ॥ ૪૦॥

પવનસ્પન્દતરલં પેલવઃ કાયપલ્લવઃ ।
જર્જરસ્તનુવૃત્તશ્ચ નેષ્ટો મે કટુનીરસઃ ॥ ૪૧॥

ભુક્ત્વા પીત્વા ચિરં કાલં બાલપલ્લવપેલવામ્ ।
તનુતામેત્ય યત્નેન વિનાશમનુધાવતિ ॥ ૪૨॥

તાન્યેવ સુખદુઃખાનિ ભાવાભાવમયાન્યસૌ ।
ભૂયોઽપ્યનુભવન્કાયઃ પ્રાકૃતો હિ ન લજ્જતે ॥ ૪૩॥

સુચિરં પ્રભુતાં કૃત્વા સંસેવ્ય વિભવશ્રિયમ્ ।
નોચ્છ્રાયમેતિ ન સ્થૈર્યં કાયઃ કિમિતિ પાલ્યતે ॥ ૪૪॥

જરાકાલે જરામેતિ મૃત્યુકાલે તથા મૃતિમ્ ।
સમ એવાવિશેષજ્ઞઃ કાયો ભોગિદરિદ્રયોઃ ॥ ૪૫॥

સંસારમ્ભોધિજઠરે તૃષ્ણાકુહરકાન્તરે ।
સુપ્તસ્તિષ્ઠતિ મુક્તેહો મૂકોઽયં કાયકચ્છપઃ ॥ ૪૬॥

દહનૈકાર્થયોગ્યાનિ કાયકાષ્ઠાનિ ભૂરિશઃ ।
સંસારાબ્ધાવિહોહ્યન્તે કશ્ચિત્તેષુ નરં વિદુઃ ॥ ૪૭॥

દીર્ઘદૌરાત્મ્યવલયા નિપાતફલપાતયા ।
ન દેહલતયા કાર્યં કિઞ્ચિદસ્તિ વિવેકિનઃ ॥ ૪૮॥

મજ્જન્કર્દમકોશેષુ ઝટિત્યેવ જરાં ગતઃ ।
ન જ્ઞાયતેયાત્યચિરાત્કઃ કથં દેહદર્દુરઃ ॥ ૪૯॥

નિઃસારસકલારમ્ભાઃ કાયાશ્ચપલવાયવઃ ।
રજોમાર્ગેણ ગચ્છન્તો દૃશ્યન્તે નેહ કેનચિત્ ॥ ૫૦॥

વાયોર્દીપસ્ય મનસો ગચ્છતો જ્ઞાયતે ગતિઃ ।
આગચ્છતશ્ચ ભગવચ્છરીરસ્ય કદાચન ॥ ૫૧॥

બદ્ધાસ્થા યે શરીરેષુ બદ્ધાસ્થા યે જગત્સ્થિતૌ ।
તાન્મોહમદિરોન્મત્તાન્ધિગ્ધિગસ્તુ પુનઃ પુનઃ ॥ ૫૨॥

નાહં દેહસ્ય નો દેહો મમ નાયમહં તથા ।
ઇતિ વિશ્રાન્તચિત્તા યે તે મુને પુરુષોત્તમાઃ ॥ ૫૩॥

માનાવમાનબહુલા બહુલાભમનોરમાઃ ।
શરીરમાત્રબદ્ધાસ્થં ઘ્નન્તિ દોષદૃશો નરમ્ ॥ ૫૪॥

શરીરશ્વભ્રશાયિન્યા પિશાચ્યા પશલાઙ્ગયા ।
અહઙ્કારચમત્કૃત્યા છલેન છલિતા વયમ્ ॥ ૫૫॥

પ્રજ્ઞા વરાકી સર્વૈવ કાયબદ્ધાસ્થયાનયા ।
મિથ્યાધાનકુરાક્ષસ્યા છલિતા કષ્ટમેકિકા ॥ ૫૬॥

ન કિઞ્ચિદપિ દૃશ્યેઽસ્મિન્સત્યં તેન હતાત્મના ।
ચિત્રં દગ્ધશરીરેણ જનતા વિપ્રલભ્યતે ॥ ૫૭॥

દિનૈઃ કતિપયૈરેવ નિર્ઝરામ્બુકણો યથા ।
પતત્યયમયત્નેન જરઠઃ કાયપલ્લવઃ ॥ ૫૮॥

કાયોઽયમચિરાપાયો બુદ્બુદોઽમ્બુનિધાવિવ ।
વ્યર્થં કાર્યપરાવર્તે પરિસ્ફુરતિ નિષ્ફલઃ ॥ ૫૯॥

મિથાજ્ઞાનવિકારેઽસ્મિન્સ્વપ્નસમ્ભ્રમપત્તને ।
કાયે સ્ફુટતરાપાયે ક્ષણમાસ્થા ન મે દ્વિજ ॥ ૬૦॥

તડિત્સુ શરદભ્રેષુ ગન્ધર્વનગરેષુ ચ

સ્થૈર્યં યેન વિનિર્ણીતં સ વિશ્વસિતુ વિગ્રહે ॥ ૬૧॥

સતતભઙ્ગુરકાર્યપરમ્પરા
વિજયિજાતજયં હઠવૃત્તિષુ ।
પ્રબલદોષમિદં તુ કલેવરમ્
તૃણમિવાહમપોહ્ય સુખં સ્થિતઃ ॥ ૬૨॥

ઇત્યાર્ષે શ્રીમદ્વાસિષ્ઠમહારામાયણે વાલ્મીકીયે
વૈરાગ્યપ્રકરણે કાયજુગુપ્સા નામાષ્ટાદશઃ સર્ગઃ ॥ ૧૮॥

*Yogavasishtha*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*